3
1919

140766

अथसिध्धांतमुक्तावल्लीप्रारंभः॥ग्रंथसंख्या १६००॥

श्रीगणेशायनमः॥ चूडामणीकृतविधुवलयीकृतवासुकिः भवोभवतुभव्यायलीलातांडवपंडितः १ निजनिर्मितकारिकावलीमतिसंक्षिप्त
चिरंतनोक्तिभिः विशदीकरवाणीकौतुकानुरागात्तदयावशंवदः २ सदृष्टाद्गुणगुंफितामकृतिनांसत्कर्मणोज्ञापिकासत्सामान्यविशेषसि
त्यमिलिताभावप्रकर्षोज्वला विद्योवेद्यसमिविश्वनाथकृतिनासिद्धांतमुक्तावलीविन्यस्तामनसोमिदंविवृतनुतांसयुक्तिरेषाचिरं ३ विघ्नवि
घाताय कृतंमंगलंशिष्यशिक्षायेनिबध्नाति ग्रंथंतनजनधररुचेगोपवधूटीदुकूलचोराय तस्मैकृष्णायनमः संसारमहीरुहस्यबीजाय १ न
नुमंगलंविघ्नध्वंसप्रतिनसेतोनामिष्टप्रतिकारणं विनापिमंगलंनास्तिकादीनांयेषुनिर्विघ्नपरिसमाप्तिदृष्टेनातइतिचेन्न अविगीतशि
ष्टाचारविषयत्वेनमंगलस्यमंगलस्यफलत्वेसिद्धेविशेषफलसिद्धासाध्यासंभवतिदृष्टफलकेवेअदृष्टफलकल्पनायाअन्याय्यत्वात उपबृंहित
त्वाच्चसमाप्तिरेवफलंकल्प्यते इत्थंचमंगलंयत्रदृश्यतेतत्रापिजन्मांतरीयंतत्कल्प्यते यत्रचसत्यपिमंगलेसमाप्तिर्नदृश्यतेतत्रबलवन्नरोवि
घ्नोविघ्नाद्यर्थेवाबोध्यं श्रुत्यस्याप्येवबलवत्तरविघ्ननिवारणेकारणत्वंबोध्यं विघ्नध्वंसस्मंगलस्यद्वारमित्याहुः नचास्तमंगलस्यविघ्नध्वं
सएवफलं समाप्तिस्तुबुद्धिप्रतिभादिकारणकत्वात नचसतःसिद्धविघ्नविरहवतोऽतस्यमंगलस्यनिष्फलत्वापत्तिरितिवाच्यं इष्टापत्तेः
विघ्नशंकयातदाचरणात तथैवशिष्टाचारात नचतस्यनिष्फलत्वेनद्वाधकवेदाप्रामाण्येसतिविघ्ननाशस्यैववेदबोधितत्वात अतएवपा
पक्षयेणोत्तमस्यप्रायश्चित्तस्यनिष्फलत्वेपिनतद्बाधकवेदाप्रामाण्येतिपापेतनाशस्यैववेदबोधितत्वात मंगलेचविघ्नध्वंसविशेषकारणं॥
विघ्नध्वंसविशेषतुविनायकस्तवपाठादि क्वचिच्चविघ्नाद्यनाभावस्यैवसाधनं प्रतिबंधकसंसर्गाभावस्यैवकार्योत्पत्तौकत्वात इत्थंचनास्तिकादि
र्यंयत्रुनर्मातरीयंमंगलंजन्यदुरितध्वंसःस्वतः सिद्धविघ्नाद्यनाभावोवास्तीतिनव्यभिचारइत्याहुः संसारेति संसारएवमहीरुहः वृक्षःतस्यबी
जायनिमित्तकारणायत्यर्थः एतेनेश्वरप्रमाणंदर्शितं भवति तथाहि यथाघटादिकार्यंकर्तृजन्यंकार्यत्वात तथात्रिलोक्यंकुरादिकमपि नच
तत्कर्तृत्वमस्मादादीनांसंभवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः नचशरीराजन्यत्वेनकर्तृजन्यत्वसाधकेनसप्रतिपक्षइतिवाच्यं अप्र
योजकत्वात ममतुकर्तृत्वेनकार्यत्वेनकार्यकारणभावएवानुकूलस्तर्कः द्यावाभूमीजनयन्देवएकः विश्वस्यकर्त्ताभुवनस्यगोप्तेत्यादय
आगमाअनुसंधेयाः ३ अयुणस्तथाकर्मसामान्यसविशेषकः समवायस्तथाभावः पदार्थाःसप्तकीर्तिताः १ सप्तमस्याभावत्वकथनादेव
षण्णांभावत्वंप्राप्तं तेनभावत्वेएवयुपन्यासोनकृतः एतेचपदार्थाः वैशेषिकशास्त्रप्रसिद्धाः नैय्यायिकानामपिअविरुद्धाः प्रतिपादितंचैव
मेभाष्ये अतएवोपमानचिंतामणौसप्तपदार्थीभंगप्रसंगात्तेः सादृश्यस्यत्वअतिरिक्तपदार्थत्वमाशंकितं ननुकथमेतेएवपदार्थाः शक्ति
सादृश्यादीनामतिरिक्तपदार्थत्वात तथाहि मृण्यादिसमवहितेनदंडादिनाजन्यतेतच्छक्त्यनंतुजन्यते नेत्रमृण्यादिनावऽऽहाहानुकू
ल्यशक्तिर्नाश्यते उत्तेजकेनमृण्यादयुपसरणेनवाजन्यतइतिकल्पते एवंसादृश्यमपि अतिरिक्तःपदार्थः तद्विनष्टभावेघटेभवति सा

राम
१

5/1919

मान्येपिसत्वात यथागोत्वेनित्यंतथाश्वत्वमपिइतिसादृश्यप्रतीतेः नाप्यभावेसत्येयप्रतीयमानत्वादितिचेन्न मण्यादुभावविशिष्टस्यवद्ध्या
देर्दोहादिकंप्रतिमण्यभावादेरेववास्तांतेनहेतुत्वंकल्प्यते अनेनैवसामंजस्येनंतशक्तिर्नतत्प्रागभावध्वंसकल्पनानौचित्यात नचोत्तेजक
मतिप्रतिबंधकसद्भावेकार्योदयइतिवाच्यं उत्तेजकाभावविशिष्टमण्यभावस्यैवकारणत्वात एवंसादृश्यमपिनपदार्थांतरंकिंतुतद्विलक्षणमति
तद्गतधर्मत्वं यथाचेद्भिन्नत्वेसतिचेद्गतत्वादिकत्वादिमत्वमुखेचेद्सादृश्यं द्रव्याणिविभजते द्रव्याणीति स्थितिः पृथिवीआपोजला
नि तेजोवह्निः मरुद्वायुः व्योमआकाशः देहीआत्मा दिक्कालमनांसि एतानिनवद्रव्याणीत्यर्थः ननुद्रव्यत्वजातेःकिंमानं नहितत्प्रत्य
क्षंप्रमाणं एतज्जलपृथ्वीत्वादिषुद्रव्यत्वाग्रहादितिचेन्न भावकार्यसमवायिकारणतावच्छेदकतयासंयोगस्यविभागस्यवासमवायिकारणतावच्छे
दकतयाद्रव्यत्वजातिः सिद्धेति ननुदशमद्रव्यंनमः कुतोनोक्तं नहिप्रत्यक्षेणगृह्यते तस्यनरूपवत्त्वात्कर्मत्वाच्चद्रव्यत्वमिदं तच्चगंधश्च
न्यत्वान्नपृथिवी नीलरूपत्वाच्चनजलादिकं तत्प्रत्यक्षे चालोकनिरपेक्षचक्षुः कारणमितिचेन्न आवश्यकतेजोभावेनापत्तेरद्रव्यांतरकल्प
नायाअन्याय्यत्वात रूपवत्तयाप्रतीतिस्तुभ्रमरूपाकर्मवत्तयाप्रतीतिस्त्वालोकापसरणोपाधिकीभीतेव तमसः अतिरिक्तत्वेनतावयवादिकल्प
नागौरवंचस्यात कृष्णत्वस्ययथातेजस्यनभसः तथाग्रवक्ष्यते गुणान्विभजते अथगुणाइतिच एतेचगुणाः चतुर्विंशतिसंख्याकाः कृपा
देनकेनचःचशब्देनचदर्शिताः तत्रगुणत्वंजातिमत्त्वेसतिवक्ष्यतेकर्माणिविभजते उत्क्षेपणमितिकर्मत्वजातिस्तत्प्रत्यक्षसिद्धा एवंउत्क्षे
पणत्वादिकमपि ननुभ्रमणादिकमपिकर्मांधिकतयाप्यकुतोनोक्तं अतआह भ्रमणमिति सामान्यमिति तल्लक्षणंतुनित्यत्वेसतिअने
कसमवेतत्वं अनेकसमवेतत्वंसंयोगादीनामप्यस्तिअतउक्तंनित्यत्वेसतीति नित्यत्वेसतिसमवेतत्वंगगनपरिमाणादीनामप्यस्ति अतउक्तं
अनेकेति नित्यत्वेसति अनेकवृत्तित्वं अत्यंताभावस्याप्यस्तिअतोवृत्तिसामान्येविशेषसमवेतेत्युक्तं एकमात्रव्यक्तिवृत्तिस्तुजातिः तथा
चोक्तंव्यक्तेरभेदः सुत्यत्वंसंकरोथानवस्थितिः रूपहानिरसंबंधोजातिबाधकसंग्रहइति द्रव्यादित्रिकेति परत्वमधिकदेशवृत्तित्वं अपरत्व
मल्पदेशवृत्तित्वं सकलजात्यपेक्षयाव्यापकत्वादधिकदेशवृत्तित्वात्मतायाः परत्वं एतत्बोधनायद्रव्यादित्रिकवृत्तिरित्युक्तं तदपेक्षयाअन्या
सांजातीनांअपरत्वं व्यापकत्वादिति पृथिवीत्वाद्यपेक्षयाव्यापकत्वादधिकदेशवृत्तित्वात्परत्वं सत्तापेक्षयाव्याप्यत्वादल्पदेशवृत्तित्वाद्द्र
व्यत्वस्यापरत्वं उभयधर्मसमावेशादुभयत्वमविरुद्धं विशेषंनिरूपयति अंत्यइति अंतेअवसानेवर्त्ततःइत्यंत्यः यदपेक्षयाअन्योविशेषोना
स्तीत्यर्थः घटादीनांद्व्यणुकपर्यंतानांतत्तद्वयवभेदात्परस्परंभेदः परमाणूनांतुपरस्परंभेदकोविशेषएव सतुक्वचिदवयावर्त्तकः तेनतस्य
विशेषांतरापेक्षानास्तीतिभावः समवायंदर्शयति घटादीनामिति अवयवावयविनोर्गुणगुणिनोःक्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषनित्य

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

द्रव्ययोराश्रयः संबंधः समवायः समवायस्त्वनित्यसंबंधत्वं तत्रगुणेतुगुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसंबंधविषयादिविशिष्टबु
द्धित्वात् दंडीपुरुषइतिविशिष्टबुद्धिवत् इत्यनुमानेनसंयोगादिबाधात्समवायसिद्धिः नचस्वरूपसंबंधेनसिद्धसाधनमर्थांतरंवा अनेन
स्वरूपाणांसंबंधकल्पनागौरवात् लाघवादेकसमवायसिद्धिः नचसमवायस्यैकत्ववोरूपवतावुद्धिप्रसंगः तत्ररूपसमवायसंबंधेरू
पाभावात् नैवंसमवायस्यापिवशिष्यसंबंधांतरसिध्यादितिवाच्यं तस्यनित्यत्वेभूतलेघटानयनानंतरंअपिघटाभावबुद्धिप्रसंगात् घटा
भावस्यतत्रसत्वात् तस्यचनित्यत्वात् अन्यथादृशांतरेपिघटाभावबुद्धिर्नस्यात् वैशिष्यस्यचतत्रसत्वात् मन्मतेतुघटोपाकृस्कृतादृश
यांश्यामत्वस्यनष्टत्वादनतद्भूतबुद्धिः वैशिष्यस्यानित्यत्वलक्षणेनैवंवक्तव्यं इत्थंचतत्तत्कालीनेतत्तद्भूतलादिकेनतत्तदभा
वानांसंबंधः अभावोविभजते अभावस्त्विति अभावत्वंइत्यादिषट्कान्योन्याभाववत्वं संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः अन्यो
न्याभावस्यैकविधत्वात्तद्विभागाभावात् संसर्गाभावंविभजते प्रागभावइति संसर्गाभावत्वं अन्योन्याभावभिन्नाभावत्वं अन्योन्याभावत्वं
तुतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वंविनाश्यभागत्वंप्रागभावत्वं अन्याभावत्वंध्वंसत्वं नित्यसंसर्गाभावत्वं अत्यंताभावत्वं यत्रभू
तलादौघटादिकं अपसारितंपुनरानीतेचतत्रघटकालस्यसंबंधाघटकृत्वादत्यंताभावस्यनित्यत्वेपिघटकालेनघटात्यंताभावबुद्धिः नैवो
त्पादविनाशशालीचतुर्थोयमभावइतिकेचित् अत्रध्वंसप्रागभावादिकारणात्यंताभावइतिप्राचांमतं श्यामघटरक्तेनास्तिरक्तघटश्या
मेनास्तीतिधीरूप्रागभावध्वंसावगाहते नतुतदत्यंताभावंतयोर्विरोधात् नह्यस्तिनत्रविरोधमानाभावात् ध्वंसादिकालावच्छेदेनाप्य
त्यंताभावोवक्तंशक्यइत्याहुः नन्वस्तुअभावानामधिकरणात्मकत्वंलाघवादितिचेन्न अनंताधिकरणात्मकत्वकल्पनापेक्षयातिरिक्तकल्पनाया
एवलघीयस्त्वात् एवंचआधाराधेयभावोप्युपपद्यते ततश्चाधारसंयोग्याद्यभावानांप्रत्यक्षत्वमप्युपपद्यते अन्यथानतदधिकरणानांत
तदिंद्रियाग्राह्यत्वात्प्रत्यक्षत्वंनस्यात् एतेनज्ञानविशेषकालविशेषात्मकत्वंभावस्यैतिप्रत्युक्तं अप्रत्यक्षत्वापत्तेः इदानींपदार्थानांसा
धर्म्यवैधर्म्यंचवक्तुमुपक्रमते समानाभिति समानोधर्मोयेषांतेधर्माणस्तेषां भावसाधर्म्यं समानोधर्मइतिफलितोर्थः एवंविरुद्धोधर्मो
यषांतेविधर्माणः तेषांभावोवैधर्म्यं विरुद्धोधर्मइतिफलितोर्थः ज्ञेयत्वंज्ञानविषयता सानसर्वत्रास्ति ईश्वरज्ञानविषयतायाः केव
लान्वयित्वात् एवंअभिधेयत्वप्रमेयत्वादिकमपिबोध्यं इत्येति द्व्यणुकर्मसामान्यविशेषाणांसाधर्म्यंअनेकत्वंसमवायित्वंच
यद्यप्यनेकत्वमुभयत्रापिअस्तितथाप्यनेकत्वंसतिभावत्वंपदानांसाधर्म्यं तथाचानेकभावत्वंअनेकभाववृत्तिपदार्थविभाजकोपाधिमत्व
मितिफलितोर्थः तेनप्रत्येकंघटादीनाव्याप्तिः समवायित्वंसमवायिसंबंधित्वंनसंबंधित्वंनतुसमवायवत्वं सामान्यादेरभावात् समवे

I
1919

तवृत्तिपदार्थविभाजकोपाधिमत्वंवा तेननित्यद्रव्येषुसमवेतत्वाभावेपिनाव्याप्तिः सतावंतइति द्रव्यगुणकर्मणांसतावत्त्वमित्यर्थः गु
णादिरिति यद्यपिगुणक्रियाशून्यत्वंआद्यक्षणेघटादावतिव्याप्तंक्रियाशून्यत्वंचगगनादावतिव्याप्तं तथापिगुणवदवृत्तिधर्मवत्वं कर्मवदवृत्ति
धर्मवत्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्वंवृत्तदर्थः नहिघटत्वादिकंद्रव्यत्वंवागुणवदवृत्तिकर्मवदवृत्तिवाकिंतुगुणत्वादिकंतथाच
आकाशत्वादिकंतुनपदार्थविभाजकोपाधिः सामान्येति सामान्यानधिकरणत्वंसामान्यादीनामित्यर्थः परिमाडल्येति परिमाडल्यंअणु
परिमाणंतद्भिन्नानोकारणत्वमित्यर्थः अणुपरिमाणं नकस्यापिकारणं तद्धिस्याश्रयारब्धद्रव्यपरिमाणारंभकंभवेत् तच्चनसंभवति प
रिमाणस्यस्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात् महदारब्धस्यमहत्तरत्ववत् अणुजन्यस्याणुतरत्वप्रसंगात् एवंपरममहत्प
रिमाणंतादृशसामान्यंविशेषाश्चेतिबोध्यं आत्ममानसप्रत्यक्षेआत्ममहत्त्वस्यकारणत्वात्परममहत्परिमाणमाकाशादेर्बोध्यं तस्यापिन
कारणत्वमित्याचार्याणामाशयइत्यन्येतन्न ज्ञानातिरिक्तप्रत्यकारणतायाएवाचार्योक्तत्वात् इदमपियोगिप्रत्यक्षेविषयस्यनकारण
तं ज्ञायमानंसामान्यंनप्रत्यासत्तिः ज्ञानमानंलिंगेनानुमितिकरणंइत्यभिप्रायेण ननुकारणत्वेकिमतआह अन्यथेति तस्यकारणत्वस्य॥
समवायिकारणत्वमिति तत्रेति समवायिकारणेप्रत्यासन्नंकारणद्वितीयंसमवायिकारणमित्यर्थः अत्रयद्यपितुरीतंसंयोगघटासमवा
यिकारणत्वंस्यान्न एवंवेगादीनामपिअभिघाताद्यसमवायिकारणत्वंस्यात् एवंज्ञानादीनामपिइच्छाद्यसमवायिकारणत्वंस्यात् तथापिपटा
समवायिकारणत्वलक्षणेतुरीतंतुसंयोगभिन्नत्वंदेयं तुरीतंतुसंयोगस्तुरीपटसंयोगंप्रत्यसमवायिकारणंभवत्येव एवंवेगादिकंवेगसंदना
समवायिकारणंभवत्येवेति तत्तत्कार्यासमवायिकारणलक्षणेतत्तद्भिन्नत्वंदेयं आत्मविशेषगुणानांतुबुद्ध्याप्यसमवायिकारणत्वेनास्ति तेन
तत्तद्भिन्नत्वंसामान्यलक्षणेदेयमेव अत्रसमवायिकारणेप्रत्यासन्नंद्विविधं कोयैकार्थप्रत्यासत्याकारणेकार्थप्रत्यासत्याच आद्योयथा
घटादिकंप्रतिकपालसंयोगादिकमसमवायिकारणंतत्रकार्येणघटेनसहकारणस्यकपालसंयोगस्यैकस्मिन्कपालेप्रत्यासत्तिरस्ति द्वितीयं
यथाघटरूपंप्रतिकपालरूपमसमवायिकारणं तत्रघटरूपंप्रतिकारणंघटः तेनसहकपालेरूपस्यैकस्मिन्कपालेप्रत्यासत्तिरस्ति तथाच
क्वचित्समवायसंबंधेनक्वचित्समवायिसमवायसंबंधेनेतिफलितोर्थः इत्थंचकार्येकार्थकारणेकार्थान्यतरप्रत्यासत्याकारणंज्ञानादिभिन्न
समवायिकारणं इतिसामान्यलक्षणेपर्यवसन्नं आभ्यांसमवायिकारणासमवायिकारणाभ्यांपरंभिन्नंकारणं तृतीयंनिमित्तकारणमित्य
र्थः इदानीमन्यथासिद्धत्वमेवकथयतीनदाह येनेत्यादिना यत्कार्यंप्रतिकारणस्यपूर्ववर्त्तितायेनरूपेणगृह्यतेतत्कार्यंप्रतिनद्रूपमन्यथा

सिद्धमित्यर्थः यथाघटं प्रतिदंडत्वमिति द्वितीयमन्यथासिद्धमाह कारणमिति यस्मात्तेनेणान्वयव्यतिरेकौनस्तः किंतुकारणमादाय अन्वयव्यतिरेकाग्रहीते तदन्यथासिद्धं यथादंडरूपे तृतीयमन्यथासिद्धमाह अन्यंप्रतिपूर्ववृत्तित्वंगृहीत्वेवयस्ययत्कार्यंप्रतिपूर्ववृत्तित्वंगृह्य तेतस्यतत्कार्यंप्रतिअन्यथासिद्धत्वं यथाघटादिकं प्रतिआकाशस्य आकाशस्यघटादिकं प्रतिआकाशत्वेनकारणत्वंस्यात् आकाशत्वंतुशब्द समवायिकारणत्वं अतःशब्दंप्रतिजनकत्वेगृहीत्वेवघटादिकं प्रतिजनकत्वंग्राह्यमतस्तदन्यथासिद्धंशब्दाश्रयत्वेनकारणत्वकान्यथासिद्धिरिति चेत्पंचमी अथाकाशस्यशब्दंप्रतिजनकत्वेकिमवच्छेदकमितिचेत् कत्वादिकंविशेषपदार्थोवेति चतुर्थमन्यथासिद्धमाह जनकेप्रतीति जनकेप्रतिपूर्ववृत्तितामपरिज्ञायमानयस्ययत्स्यात् यत्कार्यंजनकंप्रतिपूर्ववृत्तित्वंगृहीत्वेवयस्ययत्कार्यंप्रतिपूर्ववृत्तित्वंगृह्यतेतस्यतत्कार्यंप्रतिअ न्यथासिद्धत्वं यथाकुलालपितुर्घटादिकं प्रतितस्यहिकुलालपितृत्वेनघटजनकत्वेअन्यथासिद्धिः कुलालत्वेनजनकत्वेचतुरापत्तिः कुलाल मात्रस्यघटजनकत्वात् पंचममन्यथासिद्धमाह अतिरिक्तमिति अतिरिक्तमितिमथापियद्यवश्यंपूर्वभाविनः अवश्यकूप्तनिय तपूर्ववर्तिनएवकार्यंसंभवेतद्भिन्नमन्यथासिद्धमित्यर्थः अतएवप्रत्यक्षेमहत्वंकारणमनेकद्रव्यत्वमथान्यथासिद्धं तत्रहिमहत्वं अवश्यकूप्तंतेना नेकद्रव्यत्वमन्यथासिद्धं नचवैपरीत्यंकिंविनिगमकमितिवाच्यं महत्वत्वजातेः कारणतावच्छेदकत्वेलाघवात् रासभादिरिति रासभ्यादिः स्यात् यतयत्घटव्यक्तिंप्रतिरासभस्यनियतपूर्ववृत्तित्वमस्तिनत्वापिघटजातीयंप्रतिसिद्धकारणभावेदंडादिभिरवतद्धेतुरूपसंभवेरासभीत्व थासिद्धइतिभावः एतच्चेति एतच्चावश्यकत्वसा ।। एतेषुपंचसुअन्यथासिद्धेषुमध्येपंचमोअन्यथासिद्धआवश्यकः तेनैवपरोक्षरितार्थत्वात् तथाहिदंडादिभिरवश्यकूप्तनियतपूर्ववृत्तिभिरवकार्यसंभवेदंडत्वादिकं अन्यथासिद्धं नचवैपरीत्यंकिंविनिगमकमितिवाच्यं दंडत्वस्यका रत्वेणदंडघटितपरंपरायाःसंबंधत्वकल्पनेगौरवात् एवमन्येषामप्येनन्यूनातिरिक्तार्थत्वंसंभवति समवायिकारणत्वद्रव्यस्यवतिविज्ञेयं स्पष्टं गु णकर्मेति गुणकर्ममात्रवृत्तिज्ञेयमथाप्यसमवायिहेतुत्वं असमवायिकारणत्वंगुणकर्मभिन्नानांवैधर्म्यं ननुगुणकर्मणोःसधर्म्यमित्यत्रापिना त्पर्यं अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वेनदर्थः तेनज्ञानादीनामसमवायिकारणत्वविरहेपिनक्षतिः अन्यत्रेति अन्यत्रनित्य द्रव्येभ्यः आश्रितत्वमिहोच्यते नित्यद्रव्यानिपरमाण्वादिकालादीनिविहायाश्रितत्वंसाधर्म्यमित्यर्थः आश्रितत्वंतुसमवायादिसंबंधेनवृत्ति मत्वं विशेषणतयानित्यानामपिकालादौवृत्तेः कालिकविशेषणतान्यसंबंधेनवृत्तित्वमितिपरमार्थः तेनसमवायस्यसमवायेनाहत्ताबपिनक्षति तिः उदासीनद्रव्यस्यविशिष्यसाधर्म्यंवक्तुं उपक्रमते क्षित्यादीनामि क्षित्यादीनोनवानांतुद्रव्यत्वंगुणयोगिता क्षितिजलंतथातेजःपवनो मनश्चेच परापरत्वमूर्त्तत्वक्रियावेगाश्रयाअमी दशिद्रव्यंप्रतिजातावायुमनसांपरत्वापरत्ववत्वंमूर्त्तत्वक्रियावत्वंवेगवत्वंचसाधर्म्यं नचयत्रघ

टोपरत्वमपरत्वंवानोत्पत्तेनत्रव्याप्तिरितिवाच्यं परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात् मूर्त्तत्वंअपकृष्टपरि माणवत्वंतच्चएतेषामेवगगनादिपरिमाणस्यकुतोप्यपकृष्टपरिमाणत्वाभावान्नदूरवर्तकसंयोगंप्रतिसमानाधिकरणद्रव्यव्याप्यजातिमत्वं वेगव त्वंक्रियावत्त्वव्याप्यजातिमत्त्वंबोध्यं कालेति कालस्यात्मदिशोसर्वगतत्वंनरमंमहत् कालाकाशात्मदिशांसर्वमूर्त्तद्रव्यसंयोगित्वंपरम महत्वंच परममहत्वंत्वंतुजातिविशेषः अपकृष्टपरिमाणवत्वेवा क्षित्यादिति क्षित्यादिपंचकस्यानि पृथिव्यप्तेजोवायवाकाशानांभूतत्वं तच्चबाह्येंद्रियग्राह्यविशेषगुणवत्वं अत्रग्राह्यत्वंलौकिकप्रत्यक्षविषयत्वंस्वरूपेयोग्यत्वंबोध्यं तेनज्ञातोघटइतिप्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वान्नहति आत्मनिनातिप्रसंगः नवाप्रत्यक्षाविषयरूपवतिपरमाण्वादावव्याप्तिः तस्यापिस्वरूपयोग्यत्वात् महत्वलक्षणकारणांतरासंनिधानान्नप्रत्यक्षं आत्मावृत्तिविशेषगुणवत्वंतत्वं चत्वारीति चत्वारस्यर्ग्वेतिहि पृथिव्यप्तेजोवायूनांस्प र्शवत्वं द्रव्यारंभइति द्रव्यारंभश्चतुर्ष्वस्यात् पृथिव्यप्तेजोवायुषुद्रव्यारंभकत्वं नचद्रव्यानारंभकेघटादावव्याप्तिः द्रव्यसमवायिकारणवृत्ति द्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात् आकाशशरीरिणामिति अथाकाशशरीरिणा अत्याप्यवृत्तिक्षणिकोविशेषगुणइष्यते आ काशात्मनामत्याप्यवृत्तिक्षणिकविशेषगुणवत्वं आकाशस्यविशेषगुणः शब्दःसचात्याप्यवृत्तिः यदाकिंचिदवच्छेदेनशब्दउत्पद्यते त दाअन्यावच्छेदेनतदभावस्यापिसत्वात्क्षणिकत्वंतृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं योग्यविभुविशेषगुणानास्वात्तरवृत्तियोग्यविभुवि शेषगुणानाशयत्वात् प्रथमशब्दस्यद्वितीयशब्देननाशः एवंज्ञानादीनामपिज्ञानादिकंहिआत्मनिविभोशरीरावच्छेदेनउत्पद्यतघटाव छेदेनतदभावोस्त्वं अक्षणद्वयस्थायि इत्थंचात्याप्यवृत्तिविशेषगुणवत्वंक्षणिकविशेषगुणवत्वंचार्थः पृथिव्यादेरूपादिविशेषगुणास्ती त्यत्याप्यवृत्ति युक्तं पृथिव्यादावत्याप्यवृत्ति संयोगादिरस्तीत्यतोविशेषगुणस्यक्तं नचरूपादीनामपिकदाचित्तृतीयक्षणेनाशसंभवात् क्षणिकविशेषगुणवत्वंक्षित्यादावतिव्याप्तमितिवाच्यं चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्वस्यतदर्थत्वात् अपेक्षाबुद्धिःक्षण त्रयंतिष्ठतिक्षणचतुष्टयंनकिमपिज्ञानादिकंतिष्ठति रूपत्वादिकंतुक्षणचतुष्टयस्थायिन्यपिरूपादावक्तेतइतितद्व्यासः ईश्वरज्ञानस्यचतुः क्षणवृत्तित्वाज्ज्ञानत्वस्यतद्वृत्तित्वान्नक्षतिः यदाकात्मजीवात्मनोःसाधर्म्यंतदाजन्येतिनदेयं द्वेषत्वादिकमादायलक्षणसमन्वयात् पर ममहत्त्वस्यनादशगुणत्वाच्चतुर्थलक्षणेद्वित्वादीनांनाशाभ्युपगमाद् द्वित्वादीनामपितथात्वान्नदोषायविशेषेति त्रिक्षणवृत्तित्ववावा च्यं इच्छादिकमादाय आत्मनिलक्षणसमन्वयात् रूपेति रूपद्रवत्वप्रत्यक्षयोगिनःप्रथमाख्यः पृथिव्यप्तेजसांरूपवत्वेद्रवत्ववत्वे प्रत्यक्षविषयत्वंचेत्यर्थः नचचक्षुरादीनामजन्यकपालस्थघटेरूपाणश्चरूपवत्वेकिंमानमितिवाच्यं तत्रापितज्जन्यत्वेनरूपानुमानात्।।

एवंज्ञानादिकमपि:

एवंवाय्वानीतपृथिवीजलतेजोभागानामपिपृथिवीत्वादिनारूपानुमानंबोध्यं नचघटादेरुद्भूतरूपवर्णादिभिर्जलतेजसिवद्द्रवत्ववत्त्वमव्याप्तमितिवाच्यं द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात् घृतजतुप्रभृतिषुपृथिवीषुजलेषुद्भूतरूपवर्णादीनांजलिचंद्रवत्वसत्वान्नत्र चपृथिवीत्वादिसत्वानदाद्यसर्वत्रलक्षणसमन्वयः नचप्रत्यक्षविषयत्वंपरमाण्वादावव्याप्तंअतिव्याप्तंचरूपादेरितिवाच्यं लौकिकचाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात् आत्मन्यतिव्याप्तिवारणायचाक्षुषेति गुरूणांहरतीति गुरुत्वंतच्चरसत्वंपृथिवीजलयोरित्यर्थः नचघ्राणेंद्रियादीनांवाव्याप्तंनीतपार्थिवभागानांचरसादिमत्त्वेकिंमानमितिवाच्यं तत्रापिपृथिवीत्वादिनातदनुमानात् द्रवोतिति द्रवोनैमित्तिकोद्रवः पृथिवीतेजसोरित्यर्थः नचनैमित्तिकद्रवत्वंघरादेरद्भ्यादौचाव्याप्तमितिवाच्यं नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात् आत्मनइति आत्मानोभूतवर्गश्चविशेषगुणयोगिनः पृथिव्यप्तेजोवाय्वाकाशात्मनोविशेषगुणवत्त्वमित्यर्थः यदुक्तंयुग्मसाधर्म्यवैधर्म्यमितरस्यतत्र ज्ञेयत्वादिकंविहायेतिवाच्यं तच्चुनकस्यापिवैधर्म्ये केवलान्वयित्वात् स्पर्शादयश्चत्वारोगुणाः संस्कारामूर्तागुणाः स्पर्शादयश्चत्वारोगुणाः स्पर्शादयश्चत्वारोवेगश्चद्रवत्वंचगुरुत्वंरूपंरसस्तथास्नेहोवाक्ष्यतेचतुर्दशस्नेहहीनागंधायुक्ताः क्षितावेतेचतुर्दशतुर्ध्यादिषट्कंसंख्यादिपंचकंभावनातथा धर्माधर्मौगुणाएतेआत्मनस्तुचतुर्दशसंख्यादिपंचकंकालादिशोःशब्दश्चतेचरवेसंख्यादयःपंचबुद्धिरिच्छायत्नोपिचेश्वरेपरापरत्वेसंख्यादिपंचवेगश्चमानसेनचसंख्यादयःपंचवेआकाशस्यसाधर्म्यवैधर्म्यनिरूप्यसंप्रतिप्रत्येकंपृथिव्यादिकंनिरूपयति तत्रक्षितिर्गंधहेतुः गंधसमवायिकारणमित्यर्थः यद्यपिगंधवत्त्वमात्रंलक्षणमुचितंतथापिपृथिवीत्वंज्ञातंप्रमाणंपन्यासायकारणत्वमुपन्यस्तं तथाहि पृथिवीत्वंहिगंधसमवायिकारणतावच्छेदकंतयासिध्यति अन्यथागंधत्वावच्छिन्नस्यानैकत्वापत्तेः नचपाषाणादौगंधाभावाद्गंधवत्त्वमव्याप्तमितिवाच्यं तत्रापिगंधसत्त्वात् अनुपलब्धिस्तुअनुद्भूतत्वेनाप्युपपद्यते कथमन्यथातद्भस्मनिगंधउपलभ्यते भस्मनोहिपाषाणध्वंसजन्यत्वात् पाषाणापादानोपादेयत्वंसिध्यति यद्द्रव्ययद्द्रव्यध्वंसजन्यंतत्तदुपादानोपादेयमितिन्यायेन तेचेतनरजकपटमहापटध्वंसजन्ये इत्यत्रापाषाणपरमाणोःपृथिवीत्वं तथाचतस्यापिगंधवत्त्वेबाधकाभावः नानारूपवतीमृता शुक्लनीलादिभेदेननानाजातीयंपृथिव्यामेववर्त्तते नतुजलादौतत्रशुक्लस्यैवसत्त्वात् पृथिव्यांतुएकस्मिन्नपिधर्मिणिपाकवशेननानारूपसंभवात् नचनानारूपंयत्रनोत्पन्नंतत्रव्याप्तिः रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिम

राम
४

11
1919

त्वम्यरूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यवाबाध्यत्वात् वैशेषिकनयेपृथिवीपरमाणोरूपनाशस्यरूपांतरस्यचसत्वात् न्यायनयेघृतादौअपितत्सत्त्वात्तुल्यलक्षणसमन्वयः षड्विधस्तुरसस्त्वरतिं मधुरकटुकषायादिभेदेनषड्विधोरसः सपृथिव्यामेव जलेतुमधुरएवरसः अत्रापिद्रवंवद्रसद्रव्यवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वेलक्षणंयोंबाध्यः गंधस्त्विति गंधस्तद्विविधोमतः द्विविधइतिवस्तुस्थितिमात्रंनतुद्विविधगंधवत्त्वस्थितिलक्षणं द्विविधस्यवार्थत्वात् द्वैविध्यंचेसौरभासौरभभेदेनज्ञेयं स्पर्शस्तस्यातुविज्ञेयोद्भूतशीतपाकजः तस्याःपृथिव्याअनुष्णाशीतस्पर्शवत्त्वंवायावपिवर्त्ततइत्यतउक्तंपाकजइति इत्थंचपृथिव्यास्पर्शोअनुष्णाशीतइति ज्ञापनार्थंतदुक्तं पाकजस्पर्शवत्त्वमात्रंलक्षणंअधिकस्यवेव्यर्थ्यात् यद्यपिपाकजस्पर्शःघृतादौनास्तितथापिपाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थोबोध्यः णित्येति नित्यानित्याश्चसाद्याद्यनित्यास्यादणुलक्षणा अनित्यातुतदन्यास्यात्सावयवयवयोगिनी सानेत्रिधाभवेद्दृश्यमिंद्रियंविषयस्तथा योनिजातिभेदेद्दश्यमिंद्रियंघ्राणरसनचक्षुस्त्वक्क्षणं विषयोद्व्यणुकादिस्तत्रब्रह्मांडतदुद्भूतः साःपृथिवीद्विधा नित्यानित्याचेत्यर्थः अणुलक्षणा परमाणुलक्षणापृथिवीनित्या तदन्यापरमाणुभिन्नापृथिवीद्व्यणुकादिः सर्वोपि अनित्यइत्यर्थः सेवअनित्याः पृथिवीअवयवतीत्यर्थः नतुअवयविनोकिंमानं परमाणुजेरवापत्तेः नचपरमाणूनामतींद्रियत्वाद्द्व्यादेः प्रत्यक्षत्वंनस्यादितिवाच्यं एकस्यपरमाणोरतींद्रियत्वेपितत्समूहस्याप्रत्यक्षत्वायोगात् यथाएकस्यकेशस्यदूरेअप्रत्यक्षत्वेपितत्समूहस्यप्रत्यक्षत्वं नचएकस्मूलोधृतइतिबुद्धेरनुपपत्तिरितिवाच्यं एकोमहान्वधान्यराशिरितिवदुपपत्तेः नचैवंपरमाणोरतींद्रियत्वेनतत्समूहस्यापिप्रत्यक्षत्वायोगात् दूरस्थैकशस्कनातींद्रियःसन्निधानेतस्यैवप्रत्यक्षत्वात् नचतदानींदृश्यपरमाणुपुंजस्योत्पत्तेरभ्युपगमात् नचातितमतलादौकथमहत्त्वप्रत्यक्षविरोधइतिवाच्यं अदृश्यस्यदृश्यानुपादानत्वात् अन्यथाचक्षुरूपादिसंततेःकदाचिदृश्यत्वप्रसंगात् नचातितमतलादौकथमहदवयवदहनसंततेर्दृश्यदहनोत्पत्तिरितिवाच्यं तत्रतदतःपतिदृश्यदहनावयवेदृश्यदहनोत्पत्तेरभ्युपगमात् नचादृश्यनद्व्यणुकेनकथंदृश्यत्रसरेणूत्पत्तिरितिवाच्यं नहिवयंदृश्यत्वमदृश्यत्वंवाकस्यचित्स्वभावंदेवाचक्ष्महे परंतुमहत्त्वोद्भूतरूपादिकारणसमुदायवत्त्वात् दृश्यत्वं तदभावाच्चादृश्यत्वं तथाचत्रसरेणोर्महत्त्वात्प्रत्यक्षत्वं नतुद्व्यणुकादेस्तदभावात् नहित्वन्मतेपीदंसंभवति परमाणोर्महत्त्वाभावात् इत्थंचावयविसिध्योतेषामुत्पत्तिविनाशयोः प्रत्यक्षत्वादनित्यत्वं तेषांचावयवधारायाअनंतत्वेमेरुसर्षपयोरपिसाम्यप्रसंगः अतः क्वचिद्विश्रामोवाच्यः यत्रचविश्रामस्तन्नित्यंतच्चसमवेतकार्योत्पत्तिप्रसंगानित्यत्वं महत्परिमाणतारतम्यस्यगगनादौक्वचिद्विश्रांतत्वमिवाणुपरिमाणतारतम्यस्यापिक्वचिद्विश्रांतत्वमस्तीतितत्परमाणुत्वसिध्यतिः नचत्रसरेणोरेवविश्रामोस्त्वितिवाच्यं त्रसरेणुसाक्षात्कारवत्चाक्षुषद्रव्यत्वात्घटत्वानुमानेनेवदृश्यत्वसिध्यात्त्रसरेणोरवयवाःसावयवाः महद्दृश्यवयवत्वात् कपालवदित्यनुमानेनतदवयवसिध्यतिः नचेदमप्रयोजकंअपरस्य

महत्वं प्रति अनेकद्रव्यत्वस्याप्रयोजकत्वात् नचैवकेनैव तद्वयवधानापत्तिरिति वाच्यं अनवस्थाभयेनतदसिद्धेरिति सान्निध्यस्का
र्यरूपाऽपृथिवीत्रिविधाशरीरेंद्रियविषयभेदादित्यर्थः तत्रदेहमुदाहरति योनिजादिमदेहमिति योनिजमयोनिजंचेत्यर्थः योनिजमपि
द्विविधं जरायुजमंडजंच जरायुजं मानुषादीनां अंडजं सर्पादीनां अयोनिजं स्वेदजोद्भिदादिकं स्वेदजान्त्रिमिदंत्राद्याः उद्भिज्जमुत्स्याद्याः
नारकीणांशरीरमप्ययोनिजं नचमानुषादिशरीराणांपार्थिवत्वेकिंमानमितिवाच्यं गंधादिमत्त्वस्यैवप्रमाणत्वात् नचकूष्माण्डादिरूपलंभादा
प्यत्वादिकं स्यादितिवाच्यं तथासतिजलतत्पृथिवीत्वादिनासंकरत्वप्रसंगात् नचतर्हिजलत्वादिकमेवास्त्वनुपपृथिवत्वमितिवाच्यं कूष्मादी
नांविनाशेपिशरीरेतत्प्रत्यभिज्ञानात् गंधाद्युपलब्ध्यन्यथानुपपत्त्यापृथिवीत्वसिद्धेः तेनपार्थिवादिशरीरंजलादीनांनिमित्तत्वमात्रंबोध्यं शरीरंतुनजा
तिः पृथिवीत्वादिनासांकर्यात् किंतुचेष्टाश्रयत्वं वृक्षादीनामपिचेष्टासत्त्वान्नाव्याप्तिः चेष्टाचहिताहितप्राप्तिपरिहारार्थाक्रियानतुस्पंदन
मात्रं तथासतिव्याप्तेः नचवृक्षादेः शरीरत्वेकिंमानमितिवाच्यं आध्यात्मिकवायुसंबंधस्यप्रमाणत्वात् अन्यथैवंकिंमानमितिचेत् भग्न
क्षतरोहणादिनानदुन्नयात् यदिहस्तोदरशरीरमवहरानभवति मतदोसावयवित्वेनविशेषणीयं नचयत्रशरीरे चेष्टानजातातत्राव्या
प्तिरितिवाच्यं नादृष्टप्रमाणाभावात् अथवाचेष्टावदवयवित्वेनविशेषणं व्याप्यजातिमत्त्वंवामनुषत्वचैत्रत्वादिजातिमादायलक्षणस
मन्वयः नचनरसिंहशरीरेकथंतल्लक्षणसमन्वयः तत्रनरसिंहत्वस्यैकव्यक्तिवृत्तितयाजातित्वाभावात् जलीयंतेजसांशरीरवृत्तितयादेवत्व
स्यापिजातित्वाभावादितिवाच्यं कृत्स्नभेदेनतत्रनरसिंहशरीरस्यनानात्वेननरसिंहत्वजात्याव्याप्तिलक्षणसमन्वयात् इंद्रियंघ्राणलक्षणं घ्राणेंद्रियपा
र्थिवमित्यर्थः पार्थिवत्वंकथमितिचेत् रूपं घ्राणेंद्रियपार्थिवरूपादिषुपंचसुमध्येगंधस्यैवव्यंजकत्वात् कुंकुमगंधाभिव्यंजकस्यतादिवत्
नचदृष्टांतेस्वीयरूपाधिक्येव्यंजकत्वादसिद्धिरितिवाच्यं परकीयरूपाद्यनभिभवव्यंजकस्यतदर्थत्वात् नचनवशरावगंधव्यंजकजलेऽनै
कांतिकमितिवाच्यं तस्यसत्कुरभिमिव्यंजकत्वात् यद्वापरकीयेतिनदयं वायूपनीतकरभिभागस्यदृष्टांतत्वसंभवात् नचघ्राणेंद्रियस
न्निकर्षस्यगंधमात्रव्यंजकत्वात् तत्रव्यभिचारइतिवाच्यं इत्थंचसतीतिविशेषणात् विषयोद्भूतकादिस्कन्नस्रोतउदाहृतः उपभो
गसाधनंहिविषयः ११ सर्वमेवहिकार्यजातंअदृष्टाधीनंतत्तदुपभोगसाक्षात्परंपरयावाजनयत्येवनहिबीजमयो
ग्यनाभ्योविनाकस्यचिदुत्पत्तिरस्ति तत्रद्व्यणुकादिकंब्रह्मांडांतसर्वमेवविषयोभवति शरीरेंद्रिययोर्विषयत्वेपिप्रकारांतरेणान्यासः शि
ष्यबुद्धिवैशिष्ट्यार्थः जलंनिरूप्यते वर्णः शुक्लोरसस्यशीतजलेमधुरशीतलोस्पर्शस्तदुभयसमवायिकारणतावच्छेदकतया जलत्वजातिः सिध्य
ति यद्यपिस्निग्धत्वंनित्यानित्यवृत्तितयानकार्यतावच्छेदकं तथापिजन्यस्नेहत्वंतथाबोध्यं अथपरमाणुजलत्वंनस्यात् तज्जन्यस्नेहाभा

वात् तस्यचनित्यस्यस्वरूपयोग्यत्वेफलावश्यंभावनियमादितिचेन्न जन्यस्नेहजनकतावच्छेदकतयाजन्यजलत्वजातेःसिध्दोतदवच्छिन्नजन
कतावच्छेदकतयाजलत्वजातिसिध्देः शुक्लरूपमेवजलस्येतिदर्शयितुवर्णः शुक्लइति नतुशुक्लरूपवत्त्वलक्षणं अथवानेमित्तिकद्रवत्ववृद्
वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं अभास्वरशुक्लतररूपसमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वंवातदर्थः
सस्पर्शइति जलस्यमधुरएवरसः शीतएवस्पर्शः तिक्तादिनिमधुरवद्वृत्तिद्रव्यत्वसाक्षात्व्याप्यजातिमत्वंचार्थः ननुशुक्लरूपमेवेति
कुतः कालिंदीजलादौनीलिमोपलब्धेरितिचेन्न नीलजनकतावच्छेदकतयापृथिवीत्वजातेरभावात् नलेनीलरूपासंभवात् कालिंदी
जलेनीलत्वप्रतीतिस्त्वाश्रयोपाधिकीभ्रांतेव अतएवविपत्तिविस्तेपधवल्लिमोपलब्धिः अथजलेमाधुर्यंकिमानं नहिप्रत्यक्षेण कोपिरस
स्तत्रानुभूयते नचनारिकेलजलादौमाधुर्यमुपलभ्यतएवेतिवाच्यं तस्याश्रयोपाधिकत्वात् अन्यथाजंबीरकरवीरस्वादावम्लाद्युपल
ब्धेरम्लादिमत्वमपिस्यादितिचेन्न हरीतक्यादिभक्षणस्यजलंरसव्यंजकत्वात् नचहरीतक्यामेवजलोष्मसंयोगाद्रसोत्पत्तिरितिवाच्यं।
कल्पनागौरवात् पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्चजलेनाम्लादिकं जंबीरकरवीरस्वादाश्रयोपाधिकीत्वाभ्रांतीति एवंजन्यशीतस्प
र्शजनकतावच्छेदकं जलत्वंवाबाधोध्यं एतच्चंदनादौशीत्योपलब्धिश्चंदनादावर्वाक्तिशीततरसलिलस्येवतेजः संयोगाज्जलेउष्णत्वभ्रांतिरोपा
धिकीस्पृष्टेव तत्पाकासंभवात् स्नेहस्तद्वदवस्तुसांसिद्धिकमुदाहृतं घृतादावपितदंतर्वर्तिजलस्यैवस्नेहः जलस्यैवस्नेहसमवायिकार
णत्वात् तेनजलेष्वस्नेहइतिमंतव्यं द्रव्यत्वमिति सांसिद्धिकद्रवत्वंजातिविशेषः प्रत्यक्षसिध्यस्तदवच्छिन्नतज्जनकतावच्छेदकमपित
द्रवेतिभावः तैलादावपिजलस्येवद्रवत्वंस्नेहप्रकर्षेणचदहनानुकूल्यमितिवक्ष्यति नित्यतादिप्रथमवत् पृथिव्यादेरित्यर्थः तथाहिजलंद्वि
विधं नित्यमनित्यंच परमाणुरूपंनित्यं द्व्यणुकादिसर्वमनित्यं अवयवसंभवंतंच अनित्यमपित्रिविधं शरीरेंद्रियविषयभेदात् पृथिवीतो
योविशेषस्तमाह किंतुदेहमयोनिजं अयोनिजमवेत्यर्थः जलीयंशरीरमयोनिजंवरुणलोकेऽस्मिंद्रेंद्रियरसनेजलीयमित्यर्थः तथा
हिरसनेजलीयंगंधाद्यव्यंजकत्वेसतीरसव्यंजकत्वात् सत्कुरसाभिव्यंजकादकवत् रसनसन्निकर्षव्यभिचारवारणायद्रव्यत्वंदेयं विषय
निरूपयति सिंधुहिमादिर्विषयोमतः सिंधुः समुद्रः हिमंतुषारः आदिपदात्सरित्कासारकरकादिः सर्वोपिग्राह्यः ननुहिमकरयोः क
ठिणत्वात्पार्थिवत्वमितिवाच्यं उष्णाविलीनयोस्तयोर्जलत्वस्यप्रत्यक्षसिध्यत्वात् यद्व्ययद्व्यंसजन्यमितिव्याप्तेर्जलोपादानोपा
देयसिध्देः अदृष्टविशेषणद्रवत्वविरोधात् करकायांकाठिन्यप्रायस्यभोतत्वात् तेजोनिरूप्यते स्पर्शउष्णस्तेजससमवायिस्यात् उष्ण
त्वंस्पर्शनिष्ठोजातिविशेषः प्रत्यक्षसिध्दः इत्थंचतन्योन्यस्यशीतसमवायिकारणतावच्छेदकंतेजस्त्वजातिविशेषस्तस्यपरमाणुवृत्तित्वंतु

जलस्येवानुसंधेयं नचोष्णस्पर्शोवह्नेर्वह्निकिरणादावव्याप्तमितिवाच्यं तत्राप्युष्णत्वस्यसत्त्वात् किंतुतदंतःपातिजलस्पर्शेनाभिभवादग्रहः ए
वंरत्नकिरणादापार्थिवस्पर्शेनाभिभवाच्चक्षुरादेरनुद्भूतत्वात् चतद्ग्रहः रूपमित्यादि रूपंशुक्लभास्वरंवैश्वानेरमरकतकिरणादापार्थिवरूपे
णाभिभवात् शुक्लरूपाग्रहः तद्रूपाग्रहेधर्मिणोपि चाक्षुषत्वंनस्यादितिचेत् नअन्यदीयरूपेणवृधर्मिणोग्रहसंभवत् शंखस्यवपितत्पीति
स्मा वर्णेरक्तशुक्लरूपंनाभिभूतं किंतुतदीयशुक्लमभिभूतमित्यन्ये नैमित्तिकमिति नैमित्तिकंद्रवत्वंतुनित्यतादिचूपूर्ववत् सुवर्णादिरूपेतज
सित्तसत्त्वात् नचैनैमित्तिकद्रवत्वंदहनादावव्याप्तंघृतादावतिव्याप्तंचेतिवाच्यं पृथिवस्तृत्तिनैमित्तिकद्रवत्ववदवृत्तिजातिमत्वस्यविवक्षितत्वा
त् पूर्ववदिति जलस्येत्यर्थः तथाहि तद्द्विविधं नित्यमनित्यंच नित्यंपरमाणुरूपं तदन्यदनित्यं अवयवसमवेतंचतच्चत्रिविधं शरीरेंद्रि
यविषयभेदात् शरीरमयोनिजमेव तच्चसमुद्रेवरुणादिपतिभं अत्रयोविशेषस्तमाह इंद्रियमितिइंद्रियंनयनंवह्निं स्वर्णादिविषयोमतः चक्षु
स्तेजसं परकीयस्पर्शोद्भूयंजकत्वेसतिपरकीयरूपव्यंजकत्वात् प्रदीपवत् प्रदीपस्यस्वीयस्पर्शोद्भूयंजकत्वात् प्रथमंपरकीयेति घटादेःस्वीय
रूपव्यंजकत्वात्व्यभिचारवारणायद्वितीयंपरकीयेति अथवाप्रभायाः दृष्टांतत्वंसंभवादाद्यंपरकीयेतिनदेयं चक्षुःसन्निकर्षेव्यभिचारवारण
यद्वत्यंतदेयं विषयेदर्शयति वह्नीति ननुसुवर्णस्यतेजस्त्वेकिंमानमितिचेत् सुवर्णंतेजसं अग्नितिप्रतिबंधकेअत्यंतानलसंयोगेप्यनुछि
द्यमानत्वादवत्वात् यन्नैवंतन्नैवंयथापृथिवीति नचाग्नियोजकंपृथिवीद्रवत्वजलद्रवत्वस्यचाग्निसंयोगेनाश्यत्वात् ननुपीतिमगुरुत्वाश्रय
स्यपार्थिवस्यापितयाग्निदुतत्वात्तेनव्यभिचारइतिचेत् जलमध्यस्थमपीक्षादवत्तस्याद्रवत्वात् अपरेतुपीतिमाश्रयस्याग्निसंयोगेपिरूपाप
रावृत्तिदर्शनात् तत्रातिबंधकंविजातीयद्रवद्रव्यंकल्प्यते तथाहि अग्निसंयोगीपीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः
अत्यंताग्निसंयोगेपिद्रवंरूपविजातीयरूपानधिकरणत्वात् जलमध्यस्थपीतपटवत् तस्यचपृथिवीजलभिन्नस्यतेजस्त्वनियमात् वायुंनि
रूपयति अपाकजोनुद्भूताशीतस्पर्शोस्पर्शवान्नेमतः अपाकजइति अनुद्भूताशीतस्पर्शस्यपृथिव्यामपिसत्त्वात् उक्तंअपाकजइति अपाकजस्पर्श
स्यजलादावपिसत्त्वादुक्तं अनुद्भूताशीतइति एतेनवायवीयोविजातीयस्पर्शोदर्शितः तज्जन्यकतावच्छेदकंवायुत्वमितिभावः तिर्यगमनवा
नेषज्ञेयस्पर्शादिलिंगकः एववायुस्पर्शादिलिंगकः वायुर्द्विस्पर्शोद्भूतिकंयेरनुमीयते विजातीयस्पर्शेनाविलक्षणज्ञानेनतृणादीना
मत्याशुगतिवादीनांकंपेनचवायोरनुमेयत्वात् यथाचवायुर्नप्रत्यक्षस्तथाग्रेवक्ष्यते पूर्ववन्मितायुक्तं वायुर्द्विविधः नित्योऽनित्यः परमा
णुरूपोनित्यस्तद्भिन्नोऽनित्यः समवेतश्चसोपित्रिविधः शरीरेंद्रियविषयभेदात् तत्रशरीरमयोनिर्जलेशरीरेवरुणलोकेयत्तेजसवा
यवीयशरीराणांपार्थिवभागोपष्टंभकत्वादुपभोगक्षमत्वे जलादीनांप्राधान्याज्जलीयत्वादिकमपि अत्रयोविशेषस्तमाह देहव्यापित्व

15
1919

मिंद्रियं शरीरव्यापकंइंद्रियंस्पर्शग्राहकंच नचवायवीयंरूपादिषुमध्येस्पर्शस्यव्यंजकत्वात् अंगसंगिसलिलेशैत्याभिव्यंजकत्वाच्च
नवानवत् विषयंदर्शयति प्राणादिस्तंमहावातपर्यंतोविषयोमतः यद्यपिअनित्योवायुश्चतुर्विधस्तस्यचातुर्विध्यंप्राणादित्यत्रवक्ष्यते तथा
पिसंक्षेपादत्रत्रैविध्यमुक्तं प्राणस्त्वेकएवहृदादिनानास्थानवशान्नासानिर्गमादिनानाक्रियावशाच्चसंज्ञाभवति आकाशंनिरूपयति आ
काशस्यतुविज्ञेयः शब्दोवैशेषिकोगुणः आकाशकालदिगात्मैकैकव्यक्तित्वादाकाशत्वादिकंनजातिः आकाशत्वंशब्दाश्रयत्वे वैशे
षिकइति कथनेतुविशेषगुणांतरंव्यवच्छेद्यांशेतेनप्रमाणादिकमपिदर्शितं तथाहि शब्दोगुणः चक्षुर्ग्रहणायोग्यत्वद्रूपरहितेंद्रियग्राह्यजा
तिमत्त्वात् स्पर्शवत् शब्दःद्रव्यसमवेतगुणत्वात्संयोगवत्तदित्यनुमानेनशब्दस्यद्रव्यसमवेतत्वसिद्धेः शब्दोनस्पर्शवद्विशेषगुणः अग्नि
संयोगासमवायिकारणत्वाभावेसतिअकारणगुणपूर्वकप्रत्यक्षत्वात्सुखवत् पाकजरूपादेर्व्यभिचारवारणायसत्यंतपरुरूपादेर्व्य
भिचारवारणायाकारणपूर्वकेति जलपरमाणुरूपादेर्व्यभिचारवारणायप्रत्यक्षेति नदिक्कालमनोगुणः विशेषगुणत्वात्तनआत्मविशे
षगुणः बहिरिंद्रियग्राह्यत्वात् रूपवत् इत्थंचशब्दोधिकरणंनवमद्रव्यंगगनमामकंसिध्यतीति नचवाय्वयवेष्वतिसूक्ष्मशब्दकर्मण
सायोकारणगुणपूर्वकशब्दोत्पत्तेरिति वाच्यं अत्यादद्रव्यभाविनवायुविशेषगुणत्वाभावात् तत्रचशरीरस्यविषयस्यचाभावात् इं
द्रियंदर्शयति इंद्रियंतुभवेत्त्रेत्रं नन्वाकाशंलाघवादेकंसिध्यं श्रोत्रंपुरुषभेदात् भिन्नंकथमाकाशंस्यादतआह एकमत्रव्युपाधितः आ
काशएकमत्रापिपाधेः कर्णशष्कुल्यादिभेदाभिन्नश्रोत्रंभवतीत्यर्थः कालंनिरूपयति अन्यानोजनकःकाल तत्रप्रमाणंदर्शयितुमाह।
जगतामाश्रयोमतः इदानींघटइत्यादिप्रतीतिः सूर्यपरिस्पंदादिकंयदिविषयीकृतेतदासूर्यपरिस्पंदादिनाघटादेः संबंधोवाच्यः स च
संयोगादिर्नभवतीतिकालएवसंबंधघटकः कल्प्यते इत्थंचतस्याश्रयत्वंसम्यक्प्रमाणांतरदर्शयति परापरत्वधीहेतुः परत्वादिबुधरसाधा
रणनिमित्तंकालएव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयोन्यघवात् अतिरिक्तःकल्प्यतेइतिभावः नन्वेकस्यकालस्यसिद्धौक्ष
णादिनमासवर्षादिमन्मयभेदोनस्यादतआह क्षणादिस्यादुपाधितः कालस्त्वेकोप्युपाधिभेदात्क्षणादिव्यवहारविषयः उपाधिस्तुस्वज
न्यविभागप्रागभावावच्छेदकंपूर्वसंयोगावच्छिन्नविभागोवा पूर्वसंयोगनाशावच्छिन्नउत्तरसंयोगप्रागभावोवाऽपरसंयोगावच्छिन्न
कर्मवा नचोत्तरसंयोगानेतरक्षणव्यवहारानुपपत्तिरितिवाच्यं क्रमोत्तरमत्वादिति महाप्रलयेक्षणव्यवहारायद्यस्मिन् तदानाशप्रत्यध्वंसि
नोवादर्शनीयइति दिगादिरूपयति दूरांतिकादिधीहेतुरेकानित्यादिरुच्यते दूरत्वं अंतिकत्वंचदेशिकपरत्वापरत्वंबोध्यं तद्धरेरसाधार
णंबीजंदेशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतायादिकंसिध्यतीतिभावः ननुएकेवदिदंयदितदाग्नीप्रतीत्या

दिव्यवहारः कथमुपपद्यतामत आह उपाधिभेदादेकापिप्राच्यादिव्यपदेशभाक् यत्पुरुषस्योदयगिरिसन्निहितायादिकुतत्पुरुषस्य
साप्राची एवंउदयगिरि व्यवहिताचप्रतीची एवंतत्पुरुषापेक्षमेरुसन्निहितादिगुदीचीतद्व्यवहितानुअवाची सर्वेषामेववर्षाणांमेरुरु
त्तरतस्तिउत्तरनियमात् आत्मानंनिरूपयति आत्मेति आत्मत्वंजातिस्तुसुखदुःखादिसमवायिकारणतावच्छेदकतयासिध्यति ईश्व
रेपिसाजातिरस्ति एवमदृष्टादिरूपकारणाभावाच्चनसुखादुरवाद्युत्पत्तिः नित्यस्यस्वरूपयोग्यस्यफलावश्यंभावउत्पत्त्यपेक्षाजनक्त्वात् अ
परेतुईश्वरेसाजातिनास्त्येव प्रमाणाभावात् नचदृष्टमदृष्टत्वापत्तिः दोषवत्त्वेनविभज्यमानत्वात्यादुः इंद्रियाद्यधिष्ठाता इंद्रियाणांशरी
रस्यचपरंपरयाचैतन्यसंपादकः यद्यपिआत्मनि अहंज्ञाने अहंसुखीत्यादि प्रत्यक्षविषयत्वमस्त्येवतथापिविप्रतिपन्नानुप्रतिप्रमम
तवशरीरादिभिन्नस्तन्नीतिर्गोचरइतिप्रतिपादयितुंनशक्यतइति अतः प्रमाणांतरंदर्शयति कारणंहिसकर्तृकं बाध्यादीनोछिदाकारणानो
कर्तारमंतरेणफलानुपधानंदृष्टं एवंचक्षुरादीनांज्ञानकरणानामपिकर्तारमंतरेणफलोपधानेनोपपद्यतइति अतिरिक्तः कर्ताकल्पते।
ननुशरीरस्यैवकर्तृत्वमस्त्वतआह शरीरस्यनचैतन्यमतोव्यभिचारतः ननुचैतन्यंज्ञानादिकमेव मुक्तात्मनोत्वन्मतइवमतशरीराणाम्
पितदभावेकाक्षीत् प्राणादिभावेनज्ञानाभावस्यसिध्यतिचेन्न शरीरस्यचैतन्यबाल्यविलोकितस्यस्वविस्मरणानुपपत्तेः शरीराणामवय
वापचयापचयरूपादविनाशज्ञाप्तित्वात् नचपूर्वशरीरोत्पन्नसंस्कारेणद्वितीयशरीरसंस्कार उत्पद्यतामितिवाच्यं अनंतसंस्कारकल्प
नायांगौरवात् एवंशरीरस्यचैतन्येबालकस्यस्तनपानेप्रवृत्तिर्नस्यात् इष्टसाधनताज्ञानस्यतद्धेतुत्वात् तदानींतिष्टसाधनत्वानुभवको
भावात् मन्मतेतुजन्मांतरानुभूतेष्टसाधनत्वस्यतदानींस्मरणादेवप्रवृत्तिः ननुजन्मांतरानुभूतमन्यदपिस्मर्यतेतिवाच्यं उद्बोधकाभावात्
अनंतत्वनायुक्तोजीवनादृष्टमेवोद्बोधककल्प्यतइत्यसंसारस्यानादितयाआत्मनोनादित्वसिध्यानादिभावस्यनाशासंभवात् नित्यत्वसंभव
तीतिबोध्यं ननुचक्षुरादीनांज्ञानाद्यकरणत्वेकर्तृत्वंवास्कविरोधसाधकाभावादतआह तथात्वेचेंद्रियाणांउपघातेकथंस्मृतिः तथात्व
मितिचैतन्यमित्यर्थः उपघातेनाशेसतिअथोचक्षुरादीनामेवकथमितिपूर्वंचक्षुषासाक्षात् कृतानांचक्षुरभावेस्मरणंनस्यात् अ
नुभवितुरभावात् अन्येनानुभूतस्यअन्येनस्मरणासंभवात् अनुभवस्मरणयोःसामानाधिकरण्येनकार्यकारणभावादितिभावः ननु
चक्षुरादीनांचैतन्येमास्कृन्मनसस्तुनित्यस्यचैतन्यस्यात् अतआह मनोपिनतथानचैतन्यंज्ञानाद्याश्रयत्वंतथाभवेत् मनसोऽणुत्वात्
प्रत्यक्षत्वमहत्वस्यहेतुत्वान्मनसिज्ञानसुखादिसंवेदनस्यप्रत्यक्षानुपपत्तेरित्यर्थः यथामनसोऽणुत्वंतथाग्रवक्ष्यते ननुस्वविज्ञानेनैवात्मा त
स्यस्वतः प्रकाशरूपत्वाच्चैतन्यं ज्ञानसुखादिकंतस्यत्वाकारविशेषः तस्यापिभावत्वोदक्षणिकत्वं पूर्वपूर्वस्यात्तरविज्ञानेहेतुत्वात् सुषु

17
1919

प्तावप्यात्मविज्ञानधाराऽनिरोधेवतस्यापिभावत्वादे मृगमदवासनायाः वस्त्रइवपूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञान
संक्रांतत्वान्नानुपपत्तिः स्मरणादेरितिचेन्न तस्यजगद्विषयत्वेसर्वज्ञत्वापत्तेर्यत्किंचिद्विषयत्वेविनिगमकाभावः सुषुप्तावपिविषयावभास
प्रसंगश्चतदानींनिराकारचित्संततिरनुवर्त्ततइतिचेन्न तस्यप्रकाशत्वेप्रमाणाभावात् अन्यथाघटादीनामपिविज्ञानत्वापत्तिः नचेष्टाप
त्तिर्विज्ञानव्यतिरिक्तस्यनीलाद्याकारस्यानुभूयमानस्यापलपितुमशक्यत्वात् आकारविशेषएवायंविज्ञानस्येतिचेन्नकिमाय
माकारोतिरिक्तोविज्ञानात्तहिसमायातंविज्ञानव्यतिरिक्तननातिरिक्तेचेन्नहिसमूहालंबनेनीराकारोपिपीताकारस्यात् स्वरूपतोविज्ञ
नस्याविशेषात् अथाहरूपंनीलत्वादिर्विज्ञानधर्मइतिचेन्न नीलत्वादीनांविरुद्धानामेकस्मिन्समावेशात् इतरथाविरोधावधारणस्यैवद्
रूपपादत्वात् नवावासनानामेकमः संभवति मातृपुत्रयोरपिवासनासंक्रमप्रसंगात् नचोपादानोपादेयभावोनियामकः इतिवाच्यंतथापिवा
सनायाः संक्रमासंभवात् उत्तरस्मिन्नुत्पत्तिरेवसंक्रमइतिचेन्न तदुत्पादकाभावात् चिरनष्टोत्पादकत्वेतदासंस्कारानित्यत्वप्रसंगः क्षणि
कविज्ञानेपतिज्ञायविशेषः कल्प्यतइतिचेन्न मानाभावात् कल्प्यतेगौरवाच्च एतेनक्षणिकशरीरेष्वेवचैतन्यमित्यपिप्रयुक्तं गौरवादतिप्र
संगाभावाच्च बीजादावपिसहकारिसमवधानासमवधानाभ्यांतथोपपत्तेः कुर्वद्रूपत्वाकल्पनात् अस्मन्नहिक्षणिकविज्ञानंशरीरंनित्यविज्ञा
नमेवात्मा सत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतेश्चेतिचेन्न तस्यात्मविषयत्वासंभवस्यदर्शितत्वान्निर्विषयस्यज्ञानत्वेमानाभावात् सविषयस्येवज्ञा
नस्यानुभावात् अतोज्ञानभिन्नोनित्यआत्मेतिसिद्धे सत्यंज्ञानमितिब्रह्मपरंजीवेषुनोपयुज्यते ज्ञानाज्ञानसुखित्वासुखित्वादिभिर्जीवानां
भेदसिद्धोसुतरामीश्वरोभोक्तृभेदः अन्यथाबंधमोक्षानुपपत्तेः योहीश्वराभेदबोधकोवेदः सोपितद्भेदेननतीयत्वंप्रतिपादयन्नेतीति अभेद
भावनयापतितव्यमितिवदति अतएवसर्वेषामात्मनः समर्पिताइतिश्रयते मोक्षदशायामज्ञाननिवृत्तावभेदोज्ञायतइत्यपिन भेदस्यनित्यत्व
नानाज्ञायोगात् भेदनाशेपिव्यक्तिहयंरूपस्यैव नचद्वित्वमपिनश्यतीतिवाच्यं तवनिर्धर्मकेब्रह्मण्यसत्यत्वाभावेपिसत्यस्वरूपेनद्वित्व
वद द्वित्वाभावेपिहयात्मकोनवितिसुवचत्वात् मिथ्यात्वाभावोधिकरणात्मकसत्यत्वमितिचेन एकत्वाभावोव्यक्तिहयात्मकोद्वित्वमि
त्युच्यतां प्रत्येकमेकत्वेपिपृथिवीजद्वयोनंगंधइतिदुभयनैकमित्यस्यसर्वजनसिध्यत्वात् योपिनदानींभेदप्रतिपादकः आगमः सोपिनि
र्दुरत्वादिनासाम्यंप्रतिपादयति संपदापैकेपुरोहितोयंराजासंवृताइतिवत् अतएवनिरंजनः परमंसाम्यमुपैतिइतिश्रयते ईश्वरोपि
नज्ञानसुखरात्मा किंतुविज्ञानमानंदंब्रह्मेत्यादौविज्ञानपदेनज्ञानाश्रयएवोक्तः यःसर्वज्ञः इत्याद्यनुरोधात्
आनंदमित्यस्यानंदवदित्यर्थः अज्ञा दित्वात्मत्वर्थीयोचप्रत्ययात् अन्यथापुल्लिंगत्वात् आनंदोविदुःखाभावेनोपचर्यते भारूप

षभगमेमस्वदासंहतोहमितिवत् अस्त्वात्मन्यात्मदोनत्वसाधनंदः अस्त्वमितिश्रुतेः नविद्यतेस्त्वंयस्येतिकृतोनार्थइतिचेन्न क्रि
यमत्मनापत्तेः प्रकरणविरोधात्चआनंदमित्यत्रमत्वर्थीयप्रत्ययविरोधाच्चेतिसंक्षेपः एतेनप्रकृतिः कर्त्रीपुरुषः पुरुषस्यात्मज्ञानेलंप
किंतुचेतनः कार्यकारणयोर्भेदात् कार्येनाज्ञेनतिकार्यरूपतयाज्ञानस्यादित्यकारणत्वेतस्यबुद्धिगतचैतन्याभिमानान्यथानुपपत्या
नत्वस्यनबुद्धिश्चप्रकृतेः परिणामः सेवमहत्तत्वमतः करणमित्युक्तं तत्सत्वासत्वाभ्यांपुरुषस्यसंसारापवर्गौ तस्यापवर्गेइंद्रियप्रणालि
कयापरिणतिर्ज्ञानरूपाघटादीनांसंबंधः पुरुषैकत्वाभिमानोबुधोचैतन्याभिमानश्चभेदाग्रहात् ममेदंकर्तव्यमिति मदंशपुरुषापरा
गोबुधेः स्वच्छतयाचैतन्यप्रतिबिंबादतात्विकोदर्पणस्येवमुखोपरागः इदमितिविषयोपरागः इंद्रियप्रणालिकयापरिणतिभेदस्तात्त्विक
तिः स्वासाधिहृतदर्पणस्येवमलिनिमाकर्तव्यमितिव्यापारावेशः तेनोज्ञात्रयवसीबुध्यिस्तत्परिणामेनज्ञानेनपुरुषस्यात्तात्त्विकः संबंधः
दर्पणमलिम्लेवमुखस्योपलब्धिरुच्यते ज्ञानवत्स्वरूपेइच्छाद्वेषप्रयत्नधर्माधर्मोपबुद्धेरेव कृतिसामानाधिकरण्येनप्रतीतेः नेच्छा
बुद्धिश्चेतनापरिणामित्वात् इतिमतमपास्तं कृत्यादृष्टभोगानामिवचैतन्याव्याप्तिसामानाधिकरण्यप्रतीतेः स्वाश्रयेसामानाधिकरण्यनाभावाच्चैतनोहं
करोमीतिप्रतीतेः चैतन्यांशेभ्रमइतिचेत् कुत्रांशेकिंनेष्यतेअन्यथाबुद्धेर्नित्यत्वेमोक्षाभावअनित्यत्वेतत्पूर्वमसंसारापत्तिः अचेतनायाप्रकृ
तेः कार्यत्वाद्भेदेचैतन्यं कार्यकारणयोस्तादात्म्यादितिचेन्न अग्निपेः बुधेप्रकृतिकार्यत्वाभावादित्यर्थः कर्तुर्जन्यत्वेमानाभावादितरागा
जन्यादर्शनादित्यनादिभावनाशसंभवान्नित्यत्वं तत्किंप्रकृत्यादिकल्पनेन नचप्रकृतेः क्रियमाणानिगुणैः कर्माणिसर्वशः अहंकार
विमूढात्माकर्ताहमितिमन्यतेइत्यनेनविरोधइतिवाच्यं प्रकृतेरदृष्टस्यगुणैरदृष्टजन्येरिच्छादिभिः कर्तृत्वमवेत्यस्यतदर्थत्वात्तत्रेवंसतिक
र्तारमात्मानंकेवलंतुयः इत्यादिवदतोभगवताप्रकटीकृतोयमुपरिष्टाद्दास्यइतिसंक्षेपः धर्माधर्माश्रयोध्यक्षो आत्मत्यनुमीयते शरीर
स्यतदाश्रयत्वेदेहांतरकृतकर्मणादेहांतरेणभोगानुपपत्तेः विशेषगुणयोगतः योयंविशेषगुणसोबुद्धेनआत्मनः प्रत्यक्षंभवति नत्वन्यथा
अहंज्ञाने अहंकरोमीतिप्रतीतेः प्रवृत्त्यानुमेयोयं आत्मापरदेहादौप्रवृत्त्यादिनानुमीयते प्रवृत्तिरत्रचेष्टाज्ञानेच्छाप्रयत्नादीनांदेहअभा
वस्यैकप्रायत्वाच्चेष्टायाः प्रयत्नसाध्यत्वात्तुचेष्टयाप्रयत्नवानात्मा अनुमीयतइतिभावः अत्रदृष्टांतमाह रथगत्येवसारथिः यद्यपिरथ
कर्मचेष्टानभवति तथापितेनकर्मणासारथिर्यथानुमीयेततथाचेष्टात्मकेनकर्मणाआत्मापीतिभावः अहंकारस्याश्रयोयं अहंकारोहमिति
प्रत्ययस्तस्याश्रयोविषय आत्मानशरीरादिरितिभावः मनोमात्रस्यगोचरः मनोभिन्नेंद्रियजन्यप्रत्यक्षाविषयः मानसप्रत्यक्षविषयश्चे
त्यर्थः रूपाद्यभावेनेंद्रियेतरायोग्यत्वात् विभुरितिविभुत्वंपरममहत्वं तच्चपूर्वमुक्तमपिस्पष्टार्थमुक्तं बुध्यादिति बुध्यादिगुणवान् बु

19
1919

द्धिः स्मरवदुःखेच्छादयः चतुर्दशगुणाः पूर्वमुक्तविहितत्वाः अत्रैवप्रसंगात्कतिपयबुद्धेः प्रपंचंदर्शयति बुद्धिस्तद्विविधामता द्वैविध्यमुप
दर्शयति अनुभूतिः स्मृतिश्चस्यादिति अनुभवत्वंस्मृत्यन्यज्ञानत्वं स्मृतित्वंजातिविशेषः स्मरामीत्यनुव्यवसायानन्यथेति अनुभवत्वं
जातिरित्यपिकेचित् अनुभूतिश्चतुर्विधा प्रत्यक्षमप्यनुमितिस्तथोपमितिश्चाज्ञे एतासांचतसृणांकरणानिचत्वारि प्रत्यक्षानुमानोपमा
नशब्दाः प्रमाणानीतिसंज्ञोक्तानिवेदितव्यानि तत्रेंद्रियजन्यंज्ञानंप्रत्यक्षं यद्यपिमनोरूपेंद्रियजन्यमेवंज्ञानंतथापिइंद्रियत्वेनरूपेणेंद्रि
याणांयत्रज्ञानेकरणत्वंतत्प्रत्यक्षमितिविवक्षितं ईश्वरप्रत्यक्षंतुनलक्ष्येइंद्रियार्थसन्निकर्षोत्पन्नमितिसूत्रेतथेदोक्तत्वात् अथवाज्ञानाकरण
कंज्ञानंप्रत्यक्षं अनुमितोव्याप्तिज्ञानस्योपमितौसादृश्यज्ञानस्याज्ञाबोधेपदज्ञानस्यस्मरणेअनुभवस्यकरणत्वान्ननाव्याप्तिः इदंलक्षण
मीश्वरप्रत्यक्षसाधारणंपरामर्शजन्यंज्ञानमनुमितिः यद्यपिपरामर्शप्रत्यक्षादिकंपरामर्शजन्यंतथापिपरामर्शजन्यहत्वविषयकंज्ञानमनुमि
तिः नचैकदाचित्—हेतुविषयकानुमितेरव्याप्तिरितिवाच्यं तादृशज्ञानत्वस्यानुभवत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात् अथवाव्याप्तिज्ञान
करणकंज्ञानमनुमितिः एवंसादृश्यज्ञानकरणकंज्ञानमुपमितिः पदज्ञानकरणकंज्ञानंज्ञाबोधः वस्तुतोयत्किंचिदनुमितिव्यक्तिमादायत
द्व्यक्तिवृत्तिप्रत्यक्षावृत्तिजातिमत्वं एवंयत्किंचित्प्रत्यक्षादिकमादायतद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वंप्रत्यक्षादिकंवाऽमिति जन्यप्रत्यक्षं
विभजते घ्राणजादिभेदेनप्रत्यक्षंषड्विधंमतं घ्राणजेरामनंचाक्षुषंस्यान्नेत्रोत्थंमानसमितिषड्विधंप्रत्यक्षं नचेश्वरप्रत्यक्षस्याविभज्यत्वान्न
तेजन्यप्रत्यक्षमेवनिरूपणीयत्वात् उक्तसूत्रानुसारात् घ्राणस्यगोचरोगंधोगंधत्वादिरपिस्मृतः ग्राह्यइत्यर्थः गंधत्वादिरित्यादिपदात्सं
त्वादिपरिग्रहेः गंधस्यप्रत्यक्षत्वानहत्तिजातिरपिप्रत्यक्षा गंधाश्रययग्रहेणतुघ्राणस्यनसामर्थ्यमितिबोध्यं तथारसस्यजायाः रसत्वादिसहितइ
त्यर्थः तथाज्ञेयेपिचक्षुषेः ज्ञेयत्वादिसहितइत्यर्थः गंधोरसश्चउद्भूतोबोध्यः उद्भूतरूपेणनयनस्यगोचरोद्रव्यादि त्रीणिभाषादावनुद्भूत
रूपमितिनप्रत्यक्षं तद्धेतुरुद्भूतरूपवंति पृथक्त्वसंख्ये विभागसंयोगपरापरत्वस्नेहद्रवत्वपरिमाणयुक्तं क्रियाजातियोग्यवृत्तिः समवायश्चता
दृशः योग्यति पृथक्त्वादिकमपियोग्यव्यक्तिवृत्तिबोध्यं तादृशः योग्यव्यक्तिवृत्तिः चक्षुर्योग्यत्वमेवकथंतदाह गृह्णातिचक्षुः संबंधादा
लोकोद्भूतरूपयोः आलोकसंयोगउद्भूतरूपंचचाक्षुषप्रत्यक्षेकारणं तत्रद्रव्यचाक्षुषंप्रतितयोः समवायसंबंधेनकारणत्वं द्रव्यसमवेत
प्रत्यक्षेस्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतस्यरूपत्वादेः प्रत्यक्षेस्वाश्रयसमवेतसमवायसंबंधेनेति उद्भूतस्पर्शवद्द्रव्यसंयोगी चरः
सोपिचत्वचः सोपिउद्भूतस्पर्शोपिस्पर्शत्वादिसहितः रूपाद्यचक्षुर्योग्यं रूपभिन्नरूपत्वादिभिन्नंचयच्चक्षुर्योग्यंतत्त्वगिंद्रियस्यापि

ग्राह्यं तथा चक्षुरादिसंयोगादयोपि चक्षुर्ग्राह्यगुणाऽऽक्षिप्यंते किंत्वेतयोर्योग्यत्वनियमस्तत्रोग्राह्याऽत्यर्थः रूपमत्रापि कारणं द्रव्या
ध्यक्षे अनेत्वगिंद्रियजन्यद्रव्यप्रत्यक्षरूपंकारणं तथा चबहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्ररूपकारणमिति नवीनास्त बहिर्द्रव्यप्रत्यक्षरूपेनका
रणं प्रमाणाभावात् किंतु चाक्षुषप्रत्यक्षरूपंपार्श्वनप्रत्यक्षे चस्पर्शः कारणं अन्वयव्यतिरेकात् बहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्रेकिंकारणमि
तिचेन्न किंचित् आत्मवृत्तिज्ञाद्भिन्नविशेषगुणवत्त्वंवा प्रयोजकं अस्मद्रूपस्य कारणत्वेलाघवमितिचेन्न वायोस्त्वगिंद्रियेणाग्रहणप्रसंगा
त् ग्रहणेतिरिक्तेनउद्भूतस्पर्शएवकारणमस्तु लाघवात् प्रभायाप्रत्यक्षत्वेनिष्प्रत्यपत्तिरेवकिंनस्यात् तस्मात्प्रभांपश्यामीतिवद्दूरंस्पृशा
मीतिप्रत्ययसत्त्वाद्वायोरपिप्रत्यक्षत्वंभवत्येव बहिरिंद्रियप्रत्यक्षमात्रेतुनरूपस्यनवास्पर्शस्यहेतुत्वंवायुप्रभयोरेकत्वंगुणत्वएवकुचिद्वित्वादिकम
पिकुचित्संख्यापरिमाणाद्यनुद्भूतोदोषादित्याहुः त्वचोयोगोमनसाज्ञानकारणे त्वङ्मनः संयोगोज्ञानसामान्यकारणमित्यर्थः किंतत्रप्रमाणंसु
षुप्तिकाले त्वचंत्यक्त्वापुरीतति वर्त्तमानेनमनसाज्ञानाजननमिति ननुसुषुप्तिकालेकिंज्ञानंभविष्यति अनुभवरूपंस्मरणरूपंवा नाद्यः
अनुभवसामग्र्यभावात् तथाहि प्रत्यक्षेचक्षुरादिनामहमनःसंयोगस्यहेतुत्वादभावादेवनचाक्षुषादिप्रत्यक्षंज्ञानादेरभावादेवनमानस
प्रत्यक्षंज्ञानाद्यभावेचात्मनोपिनप्रत्यक्षमिति नापिज्ञानाभावादेवनानुमितिः सादृश्यज्ञानाभावान्नोपमितिः पदज्ञानाभावान्नाऽऽप्तोपदेशइति अ
नुभवसामग्र्यभावान्नानुभवः उद्बोधकाभावान्नस्मरणं मैवं सुषुप्तात्कालात्सन्नेछादिजनकसंबंधेनात्मनश्चप्रत्यक्षप्रसंगात् तदतींद्रि
यत्वेनानाभावात् सुषुप्तिमात्कालेनिर्विकल्पकमेवज्ञायतेऽस्यात्रापिप्रमाणाभावात् अथज्ञानमात्रेतत्त्वमनः संयोगस्यहेतुत्वंतदाप्तमनस्त्वा
क्षादिप्रत्यक्षकालेत्वाऽप्रत्यक्षंस्यात् विषयत्वेनसंयोगस्यचसत्त्वात् परस्परप्रतिबंधादेकमपिनस्यादिति अत्रकेचित्पूर्वोक्तयुक्त्यात्वत्त्व
नः संयोगस्यहेतुत्वेसिद्धेचाक्षुषादिसामग्र्यस्यज्ञानादिप्रतिबंधकत्वमनुभवानुरोधात्कल्प्यतइति अन्येतुसुषुप्तानुरोधात्त्वमनः संयोगस्य
ज्ञानेहेतुत्वंकल्प्यचाक्षुषादिप्रत्यक्षकालेत्वत्त्वमनः संयोगाभावात् नत्वाचप्रत्यक्षमिति मनोग्राह्यंसुखंदुःखमिच्छाद्वेषमतिः कृतिः ७ म
नोजन्यप्रकारविषयइत्यर्थः मतिर्ज्ञानंस्मृतिः प्रयत्नः एवंसुखत्वादिकमपिमनोग्राह्यं एवमात्मापिमनोग्राह्यः किंतुमनोमात्रस्यगोचरइत्येत
न्नष्टवंमुक्तत्वात् अत्रोक्तः ज्ञानंयन्निर्विकल्पकंस्यात्तदतींद्रियमिष्यते चक्षुषः संयोगानंतरघटइत्याकारकंघटत्वादिविशिष्टविषयंज्ञानंनसं
भवति पूर्वंविशेषणस्यघटत्वादेर्ज्ञानाभावात् विशिष्टबुद्धौविशेषणाज्ञानस्यकारणत्वात् तथाचप्रथमतोघटघटत्वयोर्वैशिष्ट्यानवगाहिः
ज्ञानंजायते तदेवनिर्विकल्पकं तच्चनप्रत्यक्षं तथाहि विषयानवगाहिज्ञानस्यप्रत्यक्षंनभवति घटमहंज्ञानामीतिप्रत्ययात् तच्चभा

21
1919

त्मनिज्ञानंप्रकारीभूयभासते ज्ञानेघटस्तत्रघटत्वंप्रकारोयः सएवविशेषणइत्युच्यते विशेषणेयद्विशेषणं तद्विशेषणतावच्छेदकमित्यु
च्यते विशेषणतावच्छेदकप्रकारकज्ञानंविशिष्टवैशिष्ट्यावगाहिज्ञानेकारणं निर्विकल्पकंचघटत्वादिकंनप्रकारत्वेनघटत्वादिविशिष्टघ
टादिवैशिष्ट्यभानेज्ञानेनसंभवति घटत्वाद्यप्रकारकंचघटादिविशिष्टज्ञानेनसंभवति ज्ञात्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकार
कत्वनियमात् महत्त्वंद्विधेहेतुः द्रव्यप्रत्यक्षेमहत्त्वंसमवायसंबंधेन द्रव्यसमवेतानांगुणकर्मसामान्यानांप्रत्यक्षेस्वाश्रयसमवायसं
बंधेन द्रव्यसमवेतानांगुणत्वकर्मत्वरूपत्वादीनांप्रत्यक्षेस्वाश्रयसमवेतसमवायसंबंधेनकारणमिति इंद्रियमिति अत्रापिषड्विधइत्यनु
षज्यते इंद्रियत्वंतुनजातिः पृथिवीत्वादिनासंकरप्रसंगात् किंतुशब्देतरोद्भूतविशेषगुणानाश्रयत्वेसतिज्ञानकारणमनःसंयोगाश्रय
त्वं आत्मादिवारणायसत्यंतेऽद्भूतविशेषगुणश्रोत्रसत्त्वात् शब्देतरेति विशेषगुणस्यरूपादेश्चक्षुषिसत्त्वात् उद्भूतेति उद्भूतत्वेनजा
तिः शुक्लत्वादिनासंकरात् नचशुक्लत्वादिव्याप्येनानेवोद्भूतत्वमितिवाच्यं उद्भूतरूपत्वादिनाचाक्षुषादौजनकत्वानुपपत्तेः किंतुशु
क्लत्वादिव्याप्यमनुद्भूतत्वेनानातदभावकूटश्चोद्भूतत्वेनतच्चसंयोगादावपि तथाचशब्देतरोद्भूतगुणः संयोगादिः चक्षुरादावस्तीतिविशेषेति
कालादिवारणायविशेष्यदलं इंद्रियावयवदूरविषयसंयोगस्यापिप्राचीमतेप्रत्यक्षजनकत्वात् इंद्रियावयववारणाय कालादेरसाधारण्यभावप्र
त्यक्षसन्निकर्षघटकतयाकारणीभूतचक्षुः संयोगाद्याश्रयस्यकालादेर्वारणायमनःपदं ज्ञानकारणमित्यपिनद्वारणाय करणंमतमिति अ
साधारणंकारणंकरणं असाधारणत्वंव्यापारवत्त्वं विषयेंद्रियसंबंधोव्यापारः सोपिषड्विधःव्यापारःसन्निकर्षः षड्विधंसन्निकर्षमुदाहरण
द्वारादर्शयति द्रव्यग्रहस्तुसंयोगात्संयुक्तसमवायतः द्रव्येषुसमवेतानांतथात्वसमवायतः तत्रापिसमवेतानांशब्दस्यसमवायतः तद्वृत्ती
नांसमवेतसमवायेनतुग्रहः प्रत्यक्षंसमवायस्यविशेषणतयाभवेत् विशेषणतयातद्भावानोग्रहोभवेत् द्रव्यप्रत्यक्षमिंद्रियसंयोग
जन्यं द्रव्यसमवेतप्रत्यक्षंइंद्रियसंयुक्तसमवायजन्यं एवमग्रेपिवस्तुतस्तद्द्रव्यचाक्षुषंप्रतिचक्षुः संयोगः कारणं द्रव्यसमवेतचाक्षुष
प्रतिचक्षुः संयुक्तसमवायः कारणं द्रव्यसमवेतसमवेतचाक्षुषंप्रतिचक्षुः संयुक्तसमवेतसमवायः एवमन्यत्रापिविशिष्यैवकार्यकार
णभावः परंतुपृथिवीपरमाणुनीलेनीलत्वं पृथिवीपरमाणौ पृथिवीत्वंचचक्षुषाकथनंस्यात्तत्रपरंपरयाऽद्भूतरूपसंबंधस्यमहत्त्व
संबंधस्यचविद्यमानत्वात् तथाहि नीलत्वंजातिरेकैव घटनीलपरमाणुनीलेचवर्त्तते तथाचमहत्त्वसंबंधोघटनीलमादायवर्त्तते
रूपसंबंधस्तुभयमादायवर्त्तते एवंपृथिवीत्वेपिघटादिकमादायमहत्त्वसंबंधोबोध्यः एवंवायौतदीयस्पर्शोद्भूतत्वसत्त्वायाश्चाक्षुषप्रत्य

सं स्यात् तस्मादुद्भूतरूपावच्छिन्नचक्षुः संयुक्तसमवायस्यद्रव्यसमवेतप्रत्यक्षेतादृग्चक्षुः संयुक्तसमवेतसमवायस्यद्रव्यसमवेतसमवेतप्रत्यक्षेकारणत्वंवोद्भे इत्थंचपरमाणुनीलादीननीलत्वादिग्रहः परमाणुचक्षुः संयोगस्यमहत्वावच्छिन्नत्वाभावात् एवंवाय्वादीन सन्नादिचाक्षुषं तत्रचक्षुः संयोगस्यरूपानवच्छिन्नत्वात् एवंयत्पटस्यघ्राणावच्छेदेनालोकसंयोगः चक्षुसंयोगस्तु अग्राद्यवच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वंचक्षुः संयोगेविशेषणंबोध्यं एवंद्रव्यस्यार्शेनप्रत्यक्षेत्वक्संयोगः कारणं द्रव्यसमवेतस्यार्शे नप्रत्यक्षेत्वक्संयुक्तसमवायः द्रव्यसमवेतसमवेतस्यार्शेनप्रत्यक्षेत्वक्संयुक्तसमवेतसमवायः अत्रापिमहत्वावच्छिन्नत्वंउद्भूतस्यचवच्छिन्नत्वंचपूर्ववद्बोध्यं एवंगंधप्रत्यक्षेघ्राणसंयुक्तसमवायः गंधसमवेतस्यघ्राणजप्रत्यक्षेघ्राणसंयुक्तसमवेतसमवायः रासनप्रत्यक्षेर सनासंयुक्तसमवायः रससमवेतस्यरासनप्रत्यक्षेरसनासंयुक्तसमवेतसमवायः कारणं शब्दप्रत्यक्षेश्रोत्रावच्छिन्नसमवायः शब्दसमवेत समवायः श्रावणप्रत्यक्षेश्रोत्रावच्छिन्नसमवेतसमवायः अत्रसर्वत्रप्रत्यक्षेलौकिकंबोध्यं वक्ष्यमाणलौकिकप्रत्यक्षेइंद्रियसंयोगा दिविनापिभवति एवमात्मप्रत्यक्षेमनःसंयोगः आत्मसमवेतसमवेतमानसप्रत्यक्षेमन संयुक्तसमवायः आत्मसमवेतसमवेतमानसप्रत्यक्षेमनः संयुक्तसमवायः कारणं अभावप्रत्यक्षेसमवायप्रत्यक्षेचइंद्रियसंबंधविशेषणताहेतुः वैशेषिकमतेतुसमवायोनप्रत्यक्षः अत्रयद्यपिविशेषणतानानाविधा तथाहि भूतलादौघटाद्यभावः संयुक्तविशेषणतयागृह्यते संख्यादेरूपाद्यभावः संयुक्तसमवेतविशेषणतया संख्यादेरूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया कादेरत्वाभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया एवंकत्वावच्छिन्नाभावत्वाभावादिकंविशेषणविशेषणतयाघटाभावादेर्घटाभावः संयुक्तविशेषणविशेषणतया एतत्सर्वदप्यूहनीयं तथापिविशेषणत्वंत्वनेकंवसाग्रह्यते अन्यथादोषादासन्निकर्षइतिप्राचांप्रवादोव्याहन्येत यदिस्यादुपलभ्येतेत्येवंयुक्तमभ्युपेयते अभावप्रत्यक्षेयोग्यानुपलब्धिः कारणं तथाहि भूतलादौघटादिज्ञानेघटाभावादिकंनज्ञाय तेतेनाभावोपलंभोप्रतियोग्युपलंभाभावः कारणं तत्रयोग्यताप्यपेक्षितासाचप्रतियोगिसत्वप्रसंजनप्रसंजितप्रतियोगिकत्वरू पा तदर्थंचप्रतियोगिनोघटादेः सत्वप्रसक्तिप्रसंजितआपादितःउपलंभरूपः प्रतीयोगीयस्यसउपलंभाभावोभावप्रत्यक्षेहे तुः तथाहि यत्रालोकसंयोगादिकंवर्त्ततेतत्रयद्यत्रघटस्यात्तर्हिउपलभ्येतेत्यापादयितुंशक्यतेतत्रघटाभावादिकंप्रत्यक्षंभवति अंधकारेतुनापादयितुंशक्यते तेनघटाभावादेरंधकारेचाक्षुषप्रत्यक्षंनस्यार्शेनप्रत्यक्षंतुभवत्येव आलोकसंयोगंविनापिस्यार्शेन

प्रत्यक्षस्यापादयितुंशक्यत्वात् गुरुत्वादिकंयदयोग्यंतदभावस्तुनप्रत्यक्षः तत्रगुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात् वायोरू पाभावः पाषाणेसारभावोवायुरितिकाभावोवक्तावनुष्णोवायुः श्रोत्रेशब्दाभावः आत्मनिस्मरणाद्यभावः एवमादायस्तन्नेंद्रियैर्गृह्यं ते तत्तत्प्रत्यक्षस्यापादयितुंशक्यत्वात् संसर्गाभावप्रत्यक्षेप्रतियोगिनोयोग्यताअन्योन्याभावप्रत्यक्षेअधिकरणयोग्यत्वमपेक्षितंत तस्तेभोदोपिशब्दादिभेदोपिचक्षुषागृह्यते एवंप्रत्यक्षालौकिकालौकिकभेदेनद्विविधं तत्रलौकिकप्रत्यक्षेपादासन्निकर्षोवर्णितः अलौकिकसन्निकर्षान्वदति अलौकिकस्तुव्यापारस्त्रिविधः परिकीर्त्तितः सामान्यलक्षणोज्ञानलक्षणायोगजस्तथेति व्यापा रःसन्निकर्षः सामान्यलक्षणइतिसामान्यंलक्षणंयस्येत्यर्थः तत्रलक्षणपदेनयदिस्वरूपमुच्यते तदासामान्यस्वरूपंप्रत्यासत्तिरि त्यर्थोलभ्यते तच्चेंद्रियसंबंधविशेष्यकज्ञानप्रकारीभूतंबोध्यं तथाहि यत्रचइंद्रियसंयुक्तोधूमादिस्तद्विशेष्यकंधूमइतिज्ञानंजाय ते तत्रज्ञानेधूमत्वंप्रकारः तत्रधूमत्वेनसन्निकर्षेणधूमाश्रयंसकलधूमापिविशेष्यकंज्ञानंजायते अत्रचयदींद्रियसंबंधमबोध्य ते तदाधूलीपटलेधूमभ्रमानंतरंसकलधूमविशेष्यकंज्ञानंनस्यात् तत्रधूमत्वेनसहइंद्रियसंबंधाभावात् मन्मतेतुइंद्रियसंबंधंधूली पटलंतद्विशेष्यकंधूमइतिज्ञानेतत्रप्रकारीभूतंधूमत्वंप्रत्यासत्तिः इंद्रियसंबंधश्चलौकिकोग्राह्यः इदंवह्निरिंद्रियस्थले मानसस्थले तुज्ञानप्रकारीभूतंसामान्यंसन्निकर्षः परंतुसमानानांभावः सामान्यं तच्चक्वचिन्मुख्यं धूमत्वादिकंक्वचिच्चानित्यंघटादियत्रएकोघ टः संयोगसंबंधेनभूतलेसमवायसंबंधेनकपालेज्ञातस्तदनंतरंसर्वेषांतद्वृत्तयोभूतलानांकपालानांज्ञानंभवतितत्रेदंबोध्यं परंतुसा मान्यंयेनसंबंधेनज्ञायतेतेनसंबंधेनअधिकरणानांप्रत्यासत्तिः किंतुयत्रयद्वृत्तिनाशानंतरंतद्वृत्तेः स्मरणंजातंतत्रसंबंधोघटवतां ज्ञानेनस्यात् सामान्यस्यतदानींमभावात् किंचेंद्रियसंबंधविशेष्यकंघटज्ञानंयत्रजातंतत्रपरदिनेइंद्रियसंबंधंविनापितादृग्ज्ञान प्रकारीभूतसामान्यस्यसत्वात् सकलविषयकंज्ञानंकुतोनजायते तस्मात्सामान्यज्ञानंप्रत्यासत्तिर्नतुसामान्यमित्याह आसत्तिरित्या दिआसत्तिराश्रयायणानुसामान्यज्ञानमिष्यते प्रत्यासत्तिरित्यर्थः सामान्यज्ञानमिति तथाचसामान्यलक्षणेत्यत्रलक्षणशब्दस्यवि षयार्थः तेनसामान्यविषयकंज्ञानंप्रत्यासत्तिरितिलभ्यते ननुचक्षुः संयोगादिकंविनापिसामान्यज्ञानंयत्रभवतेतत्रसकलघटादी नांप्रत्यक्षंस्यादतआह तदिति तदिंद्रियजतथर्मबोधमामपेक्षतेतत्स्यार्थः यदाबहिरिंद्रियेणसामान्यज्ञानंलक्षणयाज्ञानंजन नीयंतदाल्किंचिद्धर्मिणतत्सामान्यस्यतदिंद्रियजन्यज्ञानसामग्रीमपेक्षिता साचसामग्रीचक्षुः संयोगालोकसंयोगादिकं तेनअं

नित्ये

कारणेऽचक्षुरादिनातादृग्ज्ञानेनजन्यते ननुज्ञानलक्षणाप्रत्यासत्तिर्जीवनरूपायदिसामान्यलक्षणापिज्ञानरूपानदातयोर्भेदोनस्यादतआह॥
विषयीति विषयीयस्यतस्येदव्यापारोज्ञानलक्षणइति सामान्यरूपाप्रत्यासत्तिर्हितदाश्रयस्यज्ञानंजनयति ज्ञानलक्षणयाप्रत्यासत्तिस्त
यद्विषयकंज्ञानंतस्येदप्रत्यासत्तिरितिअयमर्थः प्रत्यक्षसन्निकर्षादिनाभानेनसंभवति धूमत्वेनसकलधूमानांवह्नित्वेनसकलवह्नीनांभा
नंकथंभवतितदर्थंसामान्यलक्षणास्वीक्रियते नचसकलधूमज्ञानाभावेकाक्षतिरितिवाच्यं प्रत्यक्षधूमेवह्निसंबंधस्यगृहीतत्वादन्यधूम
स्यचानुपस्थितत्वाद्धूमोवह्निव्याप्यानवतिसंशयानुपपत्तेः मन्मतेतुसामान्यलक्षणयासकलधूमोपस्थितौकालांतरीयदेशांतरीयधूमे
वह्निव्याप्यत्वसंदेहःसंभवति नचसामान्यलक्षणास्वीकारेप्रमेयत्वेनसकलप्रमेयज्ञानेजातेसर्वज्ञापत्तिरितिवाच्यं प्रमेयत्वेनसकल
ज्ञानेज्ञातेपिविशिष्यसकलपदार्थानामज्ञानत्वेनसर्वज्ञाभावात् एवंज्ञानलक्षणायाअस्वीकारेरूपिचंदनमितिज्ञानेसौरभस्यभानेक
र्यंस्यात् यद्यपिसामान्यलक्षणयापिसौरभत्वेनसौरभभानंसंभवति तथापिसौरभत्वस्यभानंज्ञानलक्षणयाएवंयत्रधूमत्वेनधूमीयपरत्वंज्ञातंतत्र
धूमीयपरत्वस्यानुभवसायभानंज्ञानलक्षणया योगजइति योगिनोद्विविधाः युक्तायुंजानश्च अतोयोगजधर्मस्यापिद्वैविध्यं युक्तस्यतावद्
योगजधर्मसहायेनमनसाआत्मादिपरिमाण्वादीनितिबल्लयपदार्थगोचरंज्ञानंसर्वदाभवतुमर्हति द्वितीयस्यचेतावद्विशेषोपिसहकारीति
इतिप्रत्यक्षंजातं श्रीगंगाननः अनुमितिंमुत्पादयति व्यापारस्तुपरामर्शः करणंव्याप्तिधीर्भवेत अनुमीयतेअनुमितोव्याप्तिज्ञानंकारणं॥
परामर्शोव्यापारः तथाहि वनपुरुषेणमहानसादौधूमवह्निव्याप्तिर्गृहीतापश्चाद्धूमएवपुरुषःकश्चित्पर्वतादौअनवच्छिन्नमूलोधूम
लेखांपश्यतितदनंतरंधूमोवह्निव्याप्यइत्येवंव्याप्तिस्मरणंतस्यभवति पश्चाच्चवह्निव्याप्यधूमवानयमितिज्ञानंभवतिसएवपरामर्शइ
त्युच्यते तदनंतरंपर्वतीयंवह्निमानितिज्ञायतेतदेवानुमितिः अत्रपराचीनास्तुव्याप्यत्वेनज्ञायमानेधूमादिर्लिंगमनुमितिकरणंवदति
तद्दूषयति ज्ञायमानोलिंगंतुकरणंनहि लिंगस्यानुमित्यकरणत्वयुक्तिमाह अमागतेनलिंगेनसंबंधस्मरणेनानुमितिस्तदा यद्यनुमितौलिंगंकर
णंस्यात्तदाःनागतेनविनष्टेनचलिंगेनअनुमितिर्नस्यात् अनुमितिकरणस्यलिंगस्यतदानींभावादिति व्याप्यस्यपक्षधर्मत्वधीःप
रामर्शउच्यते व्याप्तिविशिष्टस्यपक्षधर्मतावच्छिन्नज्ञानंपरामर्शइत्यवगाहिःज्ञानं अनुमितौजनकं तच्चव्याप्यः पक्षइतिज्ञानंपक्षोव्याप्यवानितिज्ञानंवा
अनुमितिस्तुपक्षोव्याप्यइतिज्ञानात्पक्षेसाध्यमित्याकारिका पक्षोव्याप्यवानितिज्ञानात्पक्षः साध्यवानित्याकारिका द्विविधाऽपिपरा
मर्शात्पक्षः साध्यवानित्येवअनुमित्यतीतिरित्यन्ये ननुवह्निव्याप्यधूमवान्पर्वतइतिज्ञानेविनापिपर्वतोधूमवानितिप्रत्यक्षतोधूमवा
न्वह्निव्याप्इतिस्मरणंतच्चज्ञानंहृदयंतत्रापिविशिष्टज्ञानेकरणीयं फलमुखगौरवस्यादोषत्वादिति व्याप्तेनामव्याप्यस्थयस्तुव्याप्तिः
कीदृशीत्याह व्याप्तिः साध्यवदन्यस्मिन्संबंधउदाहृता वह्निमान्धूमादित्योदौसाध्यंवह्निः साध्यवान्महानसादिः तदन्योजलहृदादिः
तदवृत्तित्वेधूमस्यतिलक्षणसमन्वयः धूमवान्वह्नित्यादौसाध्यवदन्यस्मिन अयःपिंडादौवह्निसत्वान्नातिव्याप्तिः अत्रयेनसंबंधेनसा
ध्यंतेनसंबंधेनसाध्यवान्योध्यः अन्यथासमवायसंबंधेनवह्निमान्वह्नेरबमवस्तदन्योमहानसस्तत्रधूमस्यविद्यमानत्वात अव्याप्तिप्रसं
गात् साध्यवदन्यश्चसाध्यवत्तावच्छिन्नप्रतियोगिताकभेदवान्योध्यः तेनयत्किंचिद्वह्निमतोमहानसादेर्भेदेनपर्वतादौधूमस्यसत्वेपिनक्षतिः
येनसंबंधेनहेतुर्वर्ततेनसाध्यवदन्यावृत्तिर्योध्यं तेनसाध्यवदन्यस्मिन धूमावयवेधूमस्यसमवायसंबंधेनसत्वेपिनक्षतिः साध्यवदन्यावृत्ति
त्वंचसाध्यवदन्यावृत्तित्वावच्छिन्नाभावः तेनधूमवान्वह्नेरित्यत्रसाध्यवदन्यवह्न्यादिवृत्तित्वाभावेपिनातिव्याप्तिः अत्रयद्यपिद्व्यणुक
मान्यत्वविशिष्टसत्वादिहेतोर्विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात्साध्यवदन्यस्मिन्गुणादौअवृत्तित्वेनास्तितथापिहेतुतावच्छेदकस
र्वेणावृत्तित्वंबोध्यं हेतुतावच्छेदकंवृत्त्यनवच्छेदकमितिफलितार्थः ननुकेवलान्वयिनिज्ञेयत्वादौसाध्येसाध्यवदन्यस्याप्रसिद्धत्वादव्या
प्तिः किंचसत्तावान्जातेरित्यादौसाध्यवदन्यस्मिन्सामान्यादौहेतुतावच्छेदकसंबंधेनसमवायेनवृत्तेरप्रसिद्धत्वाद्व्याप्तिरतआह
अथवाहेतुमन्निष्ठविरहप्रतियोगिता साध्यनहेतोरधिकरणेव्याप्तिरुक्ता हेतुमन्निष्ठावृत्तिर्यस्यसतथाविरहोभावः तथाचहे
त्वधिकरणवृत्तिर्योभावस्तदप्रतियोगिनासाध्येनसहहेतोः सामानाधिकरण्यं अन्वयव्यधिकरणेपिवह्निमान्धूमादित्यादौहेत्वधिकरण
पर्वतादिवृत्तिभावप्रतियोगित्वंतत्तद्धूमादेरस्तीत्यव्याप्तिः नचसमानाधिकरणवह्निधूमयोरेवव्याप्तितिवाच्यं तद्धर्म्युभय

रूपधर्मतायाज्ञानेतत्कारणत्वे आवश्यकत्वात् विशिष्टज्ञानकल्पनेगौरवात्तेतिचेन्न व्याप्यतावच्छेदकज्ञानेपिवह्निव्याप्यवानितिज्ञा
नादनुमित्युत्पत्तेः लाघवाच्चव्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनहेतुत्वं किंचधूमवान्पर्वतइतिज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदक
भूतधूमत्वप्रकारस्यपक्षधर्मताज्ञानस्यसत्वात् नचगृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यहेतुत्वमितिवाच्यं चैत्रेणव्याप्ति
ग्रहंचैत्रस्यपक्षधर्मताज्ञानाद्नुमितिः स्यात् यदिचतत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकत्वंतत्पुरुषीयपक्षधर्मताज्ञानंतत्पुरुषीयानुमितौहे
तुरिष्यतेतदाअनंतकार्यकारणभावः मन्मतेतुसमवायेनव्याप्तिप्रकारकपक्षधर्मज्ञानेसमवायेनानुमितिंजनयत्येतावानेवकार्यकारणभा
वः यदितुव्याप्तिप्रकारकंज्ञानंपक्षधर्मताज्ञानेचस्वनेचकारणमिष्यतेतदाकार्यकारणभावद्वयंवह्निव्याप्यधूमआलोकवान्पर्वतइतिज्ञाना
प्यनुमितिःस्यादिति इत्थंचपरज्ञानहृदयंतत्रापिविशिष्टज्ञानेकरणीयं फलमुखगौरवस्यादोषत्वादिति व्याप्यानामव्याप्यस्थयस्तुव्याप्तिः
कीदृशीत्याह व्याप्तिः साध्यवदन्यस्मिन्संबंधउदाहृता वह्निमान्धूमादित्योदौसाध्यंवह्निः साध्यवान्महानसादिः तदन्योजलहृदादिः
तदवृत्तित्वेधूमस्यतिलक्षणसमन्वयः धूमवान्वह्नित्यादौसाध्यवदन्यस्मिन अयःपिंडादौवह्निसत्वान्नातिव्याप्तिः अत्रयेनसंबंधेनसा
ध्यंतेनसंबंधेनसाध्यवान्योध्यः अन्यथासमवायसंबंधेनवह्निमान्वह्नेरबमवस्तदन्योमहानसस्तत्रधूमस्यविद्यमानत्वात अव्याप्तिप्रसं
गात् साध्यवदन्यश्चसाध्यवत्तावच्छिन्नप्रतियोगिताकभेदवान्योध्यः तेनयत्किंचिद्वह्निमतोमहानसादेर्भेदेनपर्वतादौधूमस्यसत्वेपिनक्षतिः
येनसंबंधेनहेतुर्वर्ततेनसाध्यवदन्यावृत्तिर्योध्यं तेनसाध्यवदन्यस्मिन धूमावयवेधूमस्यसमवायसंबंधेनसत्वेपिनक्षतिः साध्यवदन्यावृत्ति
त्वंचसाध्यवदन्यावृत्तित्वावच्छिन्नाभावः तेनधूमवान्वह्नेरित्यत्रसाध्यवदन्यवह्न्यादिवृत्तित्वाभावेपिनातिव्याप्तिः अत्रयद्यपिद्व्यणुक
मान्यत्वविशिष्टसत्वादिहेतोर्विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात्साध्यवदन्यस्मिन्गुणादौअवृत्तित्वेनास्तितथापिहेतुतावच्छेदकस
र्वेणावृत्तित्वंबोध्यं हेतुतावच्छेदकंवृत्त्यनवच्छेदकमितिफलितार्थः ननुकेवलान्वयिनिज्ञेयत्वादौसाध्येसाध्यवदन्यस्याप्रसिद्धत्वादव्या
प्तिः किंचसत्तावान्जातेरित्यादौसाध्यवदन्यस्मिन्सामान्यादौहेतुतावच्छेदकसंबंधेनसमवायेनवृत्तेरप्रसिद्धत्वाद्व्याप्तिरतआह
अथवाहेतुमन्निष्ठविरहप्रतियोगिता साध्यनहेतोरधिकरणेव्याप्तिरुक्ता हेतुमन्निष्ठावृत्तिर्यस्यसतथाविरहोभावः तथाचहे
त्वधिकरणवृत्तिर्योभावस्तदप्रतियोगिनासाध्येनसहहेतोः सामानाधिकरण्यं अन्वयव्यधिकरणेपिवह्निमान्धूमादित्यादौहेत्वधिकरण
पर्वतादिवृत्तिभावप्रतियोगित्वंतत्तद्धूमादेरस्तीत्यव्याप्तिः नचसमानाधिकरणवह्निधूमयोरेवव्याप्तितिवाच्यं तद्धर्म्युभय

भावसत्त्वादेकसत्त्वेपिद्वयंनास्तीतिप्रतीतेः गुणवान्द्रव्यत्वादित्यादावव्याप्तेश्च तथापिसाध्यतावच्छेदकंप्रतियोगितानवच्छेदकंतद्वच्छि
न्नसाध्यसामानाधिकरण्यमितिवाच्यं ननुरूपत्वव्याप्यजातियुक्तत्वात्कृष्णत्वादिरूपाणांनीलपटादिवृत्त्यभावप्रतियोगितावच्छेदक
त्वमस्तीत्यव्याप्तिरितिचेन्न तत्रपरंपरयारूपत्वव्याप्यजातित्वस्यैवसाध्यतावच्छेदकत्वात् नहिताद्दग्धर्मावच्छिन्नभावः क्वापिवर्त्तव्या
प्तिरूपत्वव्याप्यजातिमान्नास्तीतिवुध्यापत्तेः साध्यादिभेदेनव्याप्तिभेदात्ताद्दग्धर्मावच्छिन्नसाध्यतावच्छेदकंतावच्छेदकं प्रतियोगितावच्छेदकतावच्छेदकमित्यत्रद्रव्यत्वंघटकमित्यपिवदंति दंडिमानदंडिसंयोगादित्यत्रदंडादेःसाध्यपरंपरासंबंधेदंडत्वादिकमेवावच्छेदकं साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकनवच्छेदकमितिवाच्यं रूपत्वाव्याप्यजातित्वंसाध्यतावच्छेदकतावच्छेदकं शुक्लत्वादिकंतुप्रतियोगितावच्छेदकतावच्छेदकमितिभेदः हेत्वधिकरणंचहेतुतावच्छेदकविशिष्टाधिकरणंवाच्यं तेनद्रव्यंगुणकर्मान्यत्वविशि
ष्टसत्तादित्यादौशुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वंविशिष्टद्रव्यत्वस्यनाव्याप्तिः हेतुतावच्छेदकसंबंधेनहेत्वधिकरणंबोध्यं ते
नसमवायेनधूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेपिवह्नेर्नाव्याप्तिः अभावश्चप्रतियोग्यधिकरणोबोध्यः तेनरूपसंयोगी
एतद्वृक्षत्वादित्यत्रमूलावच्छेदेनतद्वृक्षवृत्तिरूपिसंयोगाभावप्रतियोगित्वेपिरूपिसंयोगस्यनाव्याप्तिः ननुप्रतियोग्यधिकरणत्वंयदिप्र
तियोग्यनधिकरणवृत्तित्वंतदातथैवाव्याप्तिः प्रतियोगिनः रूपिसंयोगस्यानधिकरणेगुणादौवर्त्ततेःयोभावस्तस्यैववृक्षमूलावच्छेद
नसत्त्वात् यदिप्रतियोग्यधिकरणावृत्तित्वंतदासंयोगीसत्तादित्यादौअतिव्याप्तिः सत्ताधिकरणेगुणादौयः संयोगाभावस्तस्यप्रति
योग्यधिकरणवृत्तित्वविशिष्टस्यविवक्षितत्वान्न स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावइतिनिष्कर्षः प्रतियोग्यनधिकरणंचप्र
तियोगितावच्छेदकावच्छिन्नानधिकरणंबोध्यं तेनविशिष्टसत्ताभावानुज्ञातेरित्यादौज्ञात्यधिकरणगुणादेर्विशिष्टस्यसत्ताभावप्रतियो
गिसत्ताधिकरणेत्वेपिनक्षतिः अत्रचसाध्यतावच्छेदकसंबंधेनप्रतियोग्यनधिकरणत्वंबोध्यं तेनज्ञानवान्द्रव्यत्वादित्यादौसत्ताधिक
रणपटादेर्विषयतयाज्ञानाधिकरणत्वेपिनक्षतिः इत्थंचवह्निमान्नधूमादित्यादौधूमाधिकरणसमवायेनवह्निविरहसत्त्वेपिनक्षतिः
ननुप्रतियोगितावच्छेदकावच्छिन्नस्ययस्यकस्यचिदनधिकरणत्वं तत्सामान्यस्यवायत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकर
णत्वंवाविवक्षितं आद्येरूपिसंयोगीएतद्वृक्षत्वादित्यत्राव्याप्तिः रूपिसंयोगाभावस्यहिप्रतियोगितावच्छेदकावच्छिन्नोवृक्षावृत्तिरपिरूपि
संयोगोभवति तदनधिकरणंचवृक्षइति द्वितीयेतुप्रतियोग्यधिकरणाभावाप्रसिद्धिः सर्वस्यैवअभावस्यस्वरूपेणवृत्तित्वविशिष्टस्या

23
1919

भावात्मकप्रतियोगिसमानाधिकरणत्वात् नच्वह्निमान्धूमादित्यादौघराभावादिः पूर्ववृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधि
करणत्वंयद्यपिपर्वतादेस्तथापिसाध्यतावच्छेदकसंबंधेनतत्प्रतियोग्यनधिकरणभावाप्रसिद्धिः इतिवाच्यं घराभावेयावद्भावत्वस्यघराभावात्मकता
घराभावस्यवह्निरूपिप्रतियोगीतरकरणत्वपर्वतादिरितिक्रमेणप्रतियोग्यधिकरणस्याप्रसिद्धत्वात् यदिघराभावादीवद्भावादिभेदउच्यते तदा
तथापिधूमाभावद्वान्नवह्निभावादित्यादावव्याप्तिः तत्रसाध्यतावच्छेदकसंबंधःस्वरूपसंबंधस्तेनसंबंधेनसर्वस्यैवाभावस्यप्रध्वंसणवृत्तित्वविशिष्टस्वा
भावात्मकप्रतियोग्यधिकरणत्वाद्धेत्वधिकरणस्यैति नतीयेतुरूपिसंयोगाभाववान्नात्मत्वादित्यादौअव्याप्तिः तत्रात्मवृत्तिरूपिसंयोगाभावा
भावः रूपिसंयोगस्तस्यप्रतियोगितावच्छेदकंगुणसामान्याभावत्वमपितदवच्छिन्नानधिकरणत्वंचहेत्वधिकरणस्यात्मनइति मैवं यादृशप्रतियोगि
तावच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्तादृशप्रतियोगितानाश्रयत्वस्यविवक्षितत्वात् ननुकालोघटवान्कालपरिमाण्यत्रप्रतियोगिव्यधि
करणाभावाप्रसिद्धिः हेत्वधिकरणस्यमहाकालस्यजगद्धारणयामवर्षामेराभावानांसाध्यतावच्छेदकसंबंधेनकालिकविशेषणतयाप्रतियो
ग्यधिकरणत्वात् अत्रकेचित् महाकालभेदविशिष्टघराभावस्तत्रप्रतियोगिव्यधिकरणोमहाकालस्यघराधारत्वेपिमहाकालभेदविशिष्टघ
टानाधारत्वात् महाकालेमहाकालभेदाभावात् वस्तुतस्तुप्रतियोगितावच्छेदकसंबंधेनप्रतियोग्यनधीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगि
तासामान्यंयत्संबंधावच्छिन्नत्वंयधर्मावच्छिन्नत्वाभ्याभावस्तेनसंबंधेनतत्धर्मावच्छिन्नस्यहेतुव्याप्यकत्वंबोध्यं व्यापकसामानाधिकरण्यंचव्या
प्तिः इत्थंचकालाघरवान्कालपरिमाणादित्यादौसंयोगसंबंधेनघराभावप्रतियोगिनोघरस्यानधिकरणहेत्वधिकरणमहाकालेवर्त्तमानः सन्
नसंयोगेनघराभावस्यप्रतियोगितायांकालिकसंबंधावच्छिन्नत्वघटत्वावच्छिन्नत्वाभ्याभावस्यसत्त्वान्नाव्याप्तिः ननुधूमवह्निमान्धूमादित्या
दौधूमवह्निभावच्छिन्नत्वमप्रसिद्धं धूमधर्म्यामवच्छेदकत्वादितिचेन्न कंबुग्रीवादिमान्नास्तीतिप्रतीत्याकंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगित्व
विषयीकरणेनधूमधर्म्यापिअवच्छेदकत्वस्वीकारादितिसंक्षेपः यद्वाहेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यसामानाधिक
रण्येत्यपिः अन्योन्याभावस्यव्याप्यवृत्तित्वादत्रप्रतियोगिवैयधिकरण्यनदेयमतोन्नाधूमवान्वह्नेरित्यादौनाव्याप्तिरितिसंक्षेपः पक्षवृत्तित्वमित्यत्र
पक्षपदंकिंतदाह सिषाधयिषयाऽन्यसिद्धियंत्रनसिद्धति सपक्षसत्त्वंतत्रवृत्तित्वज्ञानादनुमितिर्भवेत् सिषाधयिषाविरहविशिष्टायाः सिद्धेरभावः
पक्षतातद्धर्म्यपक्षइत्यर्थः सिषाधयिषामात्रंनपक्षता विनापिसिषाधयिषांधनगर्जितेनमेघानुमानात् अतएवसाध्यसंदेहोपिनपक्षता विनापि
संदेहंतदनुमानात् सिद्धोसत्यामपिसिषाधयिषायामेवानुमितिर्भवत्येव अतः सिषाधयिषाविरहविशिष्टत्वंसिद्धेर्विशेषणं तच्चायत्रसिद्धि
र्नास्तिनत्रसिषाधयिषायांसत्यामसत्यामपिपक्षता यत्रसिषाधयिषाऽस्तितत्रसिद्धौसत्यामसत्यांचपक्षता यत्रतुसिद्धिरस्तिसिषाधयिषा
नास्तितत्रनपक्षता सिषाधयिषाविशिष्टविरहसिद्धेः सत्त्वात्ननुयत्रपरामर्शानंतरंसिद्धिस्ततः सिषाधयिषा तत्रसिषाधयिषा कालपरामर्श

र्ज्ञानाज्ञानानुमितिः यत्रसिध्यिपरामर्शसिषाधयिषाः क्रमेणभवेत्तिनत्रसिषाधयिषाकालेसिध्यभावज्ञानप्रतिबंधकाभावादेवानुमितिः यत्रसिषा
धयिषासिध्यिपरामर्शस्तत्रपरामर्शकालेसिषाधयिषेवनास्ति एवमन्यत्रापि सिध्यिकालेपरामर्शकालेचनसिषाधयिषा योग्यविभुविशेषगु
णानांयोगपद्यनिषेधात्कथंसिषाधयिषाविरहविशिष्टत्वंसिध्येर्विशेषणमितिचेन्न यत्रवह्निव्याप्यधूमवान्पर्वतोवह्निमानितिप्रत्यक्षस्मरणक्र
ततः सिषाधयिषानन्तरंपक्षतासंपन्नयेतदृशेषणस्यावश्यकत्वादिति अत्रेदंबोध्यं यादृशसिषाधयिषासत्त्वेसिध्यिसत्वेयल्लिंगकानुमितिस्सा
दृशसिषाधयिषाविरहविशिष्टसिध्यभावस्तल्लिंगकानुमितौपक्षता तेनसिध्यिपरामर्शसत्त्वेयल्लिंगकंचित्ज्ञानंजायतामितीछायामपिनानुमि
तिः वह्निव्याप्यधूमवान्पर्वतोवह्निमानितिप्रत्यक्षसत्त्वेप्रत्यक्षानिरुक्तज्ञानंजायतामितीछायानुभवत्येव एवंभ्रमपरामर्शसत्त्वे आलोकेनु
वह्निमनुमिनुयामितीछायामपिनानुमितिः सिषाधयिषाविरहकालेयादृशसिध्यिसत्त्वेनानुमितिस्तादृशसिध्यिविशिष्यवक्तव्या तेनपर्वतो
ऽस्तेजस्त्वापाषाणमयोवह्निमानितिज्ञानसत्त्वेप्यनुमितेर्नविरोधः परंतुपक्षतावच्छेदकसामानाधिकरण्येनसाध्यसिध्यभावस्तदवच्छेदेनानुमितिद
र्ज्ञानात्पक्षतावच्छेदकावच्छेदेनसिध्यिरेवप्रतिबंधिका पक्षतावच्छेदकसामानाधिकरण्येनानुमितिंप्रतिनु
सिध्यिमात्रंविरोधी इदंतुबोध्यंम् अत्रायंपुरुषोनवेतिसंशायानंतरंपुरुषत्वव्याप्यकरादिमानितिज्ञानंतत्रासत्यामनुमित्सायांपुरुषत्वस्यप्रत्य
क्षंभवतिनत्वनुमितिः अतोनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्रीकामिनीजिज्ञासादिवत्सातंत्र्येणप्रतिबंधिका एवंपरामर्शसं
नंतरंविनापिप्रत्यक्षंपक्षतादिप्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्रीभिन्नविषयकप्रत्यक्षप्रतिबंधिका हेतुप्रसंगाधीत्वा
भासान्विभजते अनेकांतविरुधश्चाप्यसिध्यः प्रतिपक्षितः कालात्ययापदिष्टश्चहेत्वाभासाश्चपंचधा आद्यःसाधारणस्त्रस्यादसाधारणकोप
रः तथैवानुपसंहारीत्रिधानेकांतिकोभवेत् तल्लक्षणंच यद्विषयकत्वेनज्ञानस्यानुमितिविरोधित्वं तद्वत्वं तथाहि व्यभिचारादिविषयकत्वेन
ज्ञानस्यानुमितिविरोधित्वान्नदोषः यद्विषकत्वंचयादृशविशिष्टविषयकत्वबोधे तत्तद्बाधप्रमस्यानुमितिविरोधित्वेपिनक्षतिः तत्रपर्वतोवह्नि
भावव्याप्यवान्पक्षइतिविशिष्टस्याप्रसिध्यत्वादितिचेन्न इष्टापत्तेः अन्यथाबाधस्यपि अनित्यदोषत्वापत्तेः तस्मात्तत्रवह्निभाव्याप्यपाषा
णमयत्वाकार इतिपरामर्शकालेवह्निव्याप्यधूमस्यनाभासत्वंभ्रमादनुमितिप्रतिबंधमात्रं हेतुस्तुनदुष्यतिइत्थंचसाध्याभाववद्वृत्तित्वादि
रूपदोषाभावाद्बाधाच्चहेतोर्यत्नकेनापिसंबंधेनेतिनव्याः परंतु यद्विषयकत्वेनज्ञानस्यानुमितिविरोधित्वं तद्वत्वंहेत्वाभासत्वं सत्प्रतिपक्षेविरो
धित्वादिकमेवनथा तद्वत्वंहेतोर्ज्ञानरूपसंबंधेन नत्वेवंवह्निमान्धूमादित्यादौपक्षेसाध्याभावविषयकत्वेनानुमितिविरोधित्वाज्ज्ञानरू

25
1919

पसंबंधेनतद्वत्वस्यापिसत्त्वात्सभ्रमेतोऽप्यिबाधितत्वापत्तिरितिवाच्यं तत्रज्ञानस्यसंबंधत्वाकल्पनात् अत्रसत्प्रतिपक्षितइतिव्यवहारेण
तत्कल्पनात् तत्रचबाधितत्वव्यवहाराभावादित्याहुः अनुमितिविरोधित्वंच अनुमितितत्कारणान्यतरविरोधित्वं तेनव्यभिचारिणोन्या
प्तिः दोषज्ञानंनयद्धेतुविषयकंतद्धेतुकानुमितौप्रतिबंधकं तेनकहेतोर्व्यभिचारज्ञानहेत्वंतरेणानुमित्यापत्त्यासदभावाद्यनवगाहित्वाच्चव्यभि
चारज्ञानस्यानुमितिविरोधित्वाभावेपिनक्षतिरितिसंक्षेपः यादृशपक्षसाध्यहेतोर्यावतोदोषस्तावदभ्यन्यूनंतत्तद्धेत्वाभासत्वंचतत्कथनंतु
तत्संभवरक्षाभिप्रायेण एवंसाधारणाद्यन्यतमत्वंअनेकांतिकत्वं साधारणःसाध्यवदन्यवृत्तिःतेनचव्याप्तिप्रतिबंधःक्रियते असाधारणः
साध्यासमानाधिकरणः तेनसाध्यसामानाधिकरण्यग्रहःप्रतिबध्यते अन्येतु सपक्षावृत्तिरसाधारणःसपक्षश्चनिश्चितसाध्यवान् इत्थं
चयदापक्षेसाध्यनिश्चियस्तदानासाधारण्यं तत्रहेतोर्निश्चयादित्याहुः अनुपसंहारीचात्यंताभावाप्रतियोगिसाध्यकादिः अनेनव्यतिरे
कव्याप्तिग्रहप्रतिबंधः क्रियते विरुद्धस्तुसाध्यव्यापकीभूताभावप्रतियोगी अयंसाध्याभावग्रहसामग्र्यैवप्रतिबंधकः सत्प्रतिपक्षस्तुप्रति
हेतुःसाध्याभावसाधकः अत्रहेतुरेवेतिविशेषः साध्याभावसाधकएवसाध्यसाधकत्वेनोपन्यस्तः इत्यशक्तिविशेषान्नायकत्वाच्चविशेषः
सत्प्रतिपक्षः साध्याभावव्याप्यवान्पक्षः अगृहीताप्रामाण्यकसाध्यव्याप्यत्वेनोपस्थितिकालीनस्तदभावव्याप्यत्वेनोपस्थितिविषयःसइ
त्यन्ये अत्रचपरस्परंसाध्याभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबंधःफलं अत्रकेचिन्न यथाघटाभावव्याप्यवत्ताज्ञानेविद्यमानेपिघटत्वरू
पसंयोगसंतिघटवत्ताज्ञानंजायते यथाचसत्यपिपीतत्वाभावव्याप्यशंखत्ववत्ताज्ञानसतिपित्तादिदोषपातः शंखत्वइतिधीः एवंकोटिद्वयव्या
प्यदर्शनेपिकोटिद्वयस्यप्रत्यक्षरूपःसंशयोभवति तथासत्प्रतिपक्षस्थलेसंशयरूपानुमितिर्भवत्येव यत्रचैककोटिव्याप्यदर्शनंतत्राधिक
बलतयाद्वितीयकोटिभानप्रतिबंधाच्चसंशयः फलबलेनाधिकबलममबलभावःकल्प्यतइत्याहुः तन्न तदभावव्याप्यवत्ताज्ञानसतितदुप
नीतभानविशेषज्ञानबोधादेरनुदयात् लौकिकसन्निकर्षजन्यदोषविशेषजन्यज्ञानमात्रस्यप्रतिबंधकत्वालाघवात् ननूपनीतभान
विशेषज्ञानबोधेनयथकप्रतिबंधकतागौरवात् तथाचप्रतिबंधकसत्त्वात्कथमनुमितिः नहिलौकिकसन्निकर्षस्थलेप्रत्यक्षमिवसत्प्रतिप
क्षस्थलेसंशयाकारानुमितिःप्रामाणिकीत्येनानुमितिभिन्नत्वेनापिविशेषणीयं यत्रचकोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात्सं
शयानान्यथा अगृहीताप्रामाण्यस्यैवविरोधिज्ञानस्यप्रतिबंधकत्वादिति अस्मिंश्चस्म आश्रयासिध्याद्यन्यतमा आश्रयासिद्धिः यत्रपक्षता
वच्छेदकस्याभावः यत्रकांचनमयः पर्वतोवह्निमानितिसाध्येततत्रपर्वतेनकांचनमयइतिज्ञानेविद्यमानेकांचनमयपर्वतेपरामर्शप्रतिबंधः
फलं स्वरूपसिद्धिस्तु पक्षेव्याप्यत्वाभिमतस्याभावः अत्रचवह्नेरयंधूमादित्यादौपक्षेव्याप्यत्वाभिमतस्यहेतोरभावज्ञातेपक्षेव्याप्यहेतुमत्ताज्ञा

नरूपस्यपरामर्शस्यप्रतिबंधः फले साध्याप्रसिध्यादयस्तव्याप्त्यसिधिः साध्येसाध्यतावच्छेदकाभावः साध्याप्रसिधिः एतज्ज्ञानेज्ञानेच
कांचनमयवह्निमानित्यादौसाध्यतावच्छेदकविशिष्टसाध्यपरामर्शप्रतिबंधः फले एवंहेतौहेतुतावच्छेदकाभावः साधनाप्रसिधिः यथाकांच
नमयधूमादित्यादौ अत्रचहेतुतावच्छेदकविशिष्टहेतुमत्ताज्ञानाभावसहकृतव्याप्तिज्ञानादेरभावः एवंवह्निमान्नीलधूमादित्यादौ गुरुत्वा
दौ धूमत्वस्यहेतुतानवच्छेदकत्वमपिव्याप्त्यसिधिरित्यपिवदंति बाधस्तुपक्षेसाध्यवदन्यत्वादिः एतस्यचानुमितिप्रतिबंधः फले तद्धर्मक ध्याभावा
तदभावनिश्चयोलौकिकसन्निकर्षजन्यदोषविशेषजन्यतज्ज्ञानमात्रविरोधी नचसंशयसाधारणंपक्षेसाध्यसंशयस्तज्ज्ञानमनुमंमतिकारणं
तद्विरोधितयानुबाधमत्प्रतिपक्षयोर्हेत्वाभासत्वमितियुक्तं अग्निसिध्यनुकानुमित्यनापत्तेः साध्यसंशयादिकंविनाप्यनुमित्युत्पत्तेः एवं
साध्याभावज्ञानंभ्रमात्मज्ञानमपिप्रतिबंधकं प्रमाणाभावात् गौरवाच्च अन्यथामत्प्रतिपक्षादावपितदभावव्याप्यज्ञानंप्रमात्मविषयकत्वे
नप्रतिबंधकत्वापत्तेः किंतुभ्रमत्वज्ञानानास्कंदितबाधबुद्धेः प्रतिबंधकतातत्रभ्रमत्वज्ञंकाविघटनद्वाप्रमाण्यज्ञानंक्वचिदुपयुज्यते नचबाधस्य
त्वपक्षेहेतुसत्वेव्यभिचारः पक्षेहेत्वभावेस्वस्वरूपासिधिरेवदोषइतिवाच्यं बाधज्ञानव्यभिचारज्ञानादेर्भेदात् किंच यत्रपरामर्शानंतरंबाधस्य
त्रव्यभिचारज्ञानादेर्नकिंचित्करत्वात् बाधस्यानुमितिप्रतिबंधकत्वंवाच्यं एवंचयत्रोत्पत्तिक्षणावच्छिन्नघटादेर्गंधव्याप्यपृथिवीत्ववत्ताज्ञानं
तत्रबाधस्यैवप्रतिबंधकत्वंवाच्यं नचपक्षेघटेगंधसत्वात्कथंबाधइतिवाच्यं पक्षतावच्छेदकदेशकालावच्छेदेनतदभावादेरनुभवसिध
त्वादितिबाधेनद्वाप्यभिन्नाहेत्वाभासास्तद्व्याप्तिरपितन्मध्यएवांतर्भवंति अन्यथाहेत्वाभासाधिक्यप्रसंगात् बाधव्याप्यसत्प्रतिपक्षोभि
न्नएव स्यादेवंत्रेणमुनिनाप्रथमोपादानात् सत्प्रतिपक्षव्याप्यत्वंनप्रतिबंधकइतिघटकार्थः यःसपक्षेविद्यतेवैधर्म्येणासाधारणस्तुसः सप
क्षसाधारणइत्यर्थः सपक्षःसाध्यवान् विपक्षःसाध्यवद्भिन्नः विरुद्धधारणायस्यपक्षवृत्तित्वमुक्तं यस्तुतादृविपक्षवृत्तित्वमेववाच्यं विरुद्ध
स्यसाधारणत्वेपिदोषवत्तावीजस्यभिन्नतयातत्पक्षार्थकर्तृत्वं यस्तुसपक्षसाधारणोनतः सत्वसाधारणेनमतः सपक्षविपक्षव्यावृत्तइत्यर्थः स
पक्षः साध्यवत्तयानिश्चितोविपक्षः साध्यशून्यतयानिश्चितः शब्दोनित्यः शब्दत्वादित्यादौयदिशब्दे नित्यत्वसंदेहः सदासपक्षत्वंघटादेर्नाम
व तद्व्यावृत्तेश्चशब्दत्वमितितदातदसाधारणंयदानुशब्दे नित्यत्वनिश्चयः तदानासाधारणः प्राचीनमतंतु नवीनमतंतुपूर्वमुक्तं तथवा राम
नुपसंहारीकेवलान्वयिपक्षकः सर्वमभिधेयंप्रमेयत्वादित्यादौ सर्वस्यैवपक्षत्वात्सामानाधिकरण्यंयद्यपिहेत्वंतराभावान्नानुमिति इदंतुनम १.४
स्यकपक्षेकदेशसहचारग्रहेपिप्रतिबंधाग्रहात्तदाज्ञानस्यव्याप्त्यसिधिरेव नतुहेत्वाभासत्वंतस्य तथापिकेवल
न्वयिसाध्यकत्वेतत्त्वमिष्टं यःसाध्यवतिनेवास्तिसविरुद्धउदाहृतः एवकारेणसाध्यवत्त्वावच्छेदनहेत्वाभावोबाधितस्तथाचसाध्य

31
1919

व्याप्यकीभूताभावप्रतियोगित्वंतदित्यर्थः असिधिंविभजते आश्रयासिधिराद्यास्वात्मस्वरूपासिधिरन्यथा व्याप्त्यसिधिरपरास्यादसिधिरत
स्त्रिधा पक्षासिधिर्यत्रपक्षोभेदेनमणिमयोगिरिः इदोऽग्नेधूमवत्तादात्म्यासिधिरथापर व्याप्त्यसिधिरपरानीलधूमादिकंभवेत् पक्षासिधिरि
ति आश्रयासिधिरित्यर्थः नीलनीलधूमवत्वंगुरुत्वयानहेतुतावच्छेदकं स्वसमानाधिकरणंव्याप्यतावच्छेदकधूमेतराघटितस्यैवव्याप्यतावच्छेदक
त्वात् धूमश्चागभावत्वसमव्याप्यस्वसमानाधिकरणेति विरुध्यायःपरामर्शहेत्वोः सत्प्रतिपक्षता कपिसंयोगकपिसंगाभावव्याप्यवत्तापरामर्शवि
नश्यत्प्रतिपक्षितत्वं अतउक्तंविरुध्येति तथाचस्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषयइत्य
र्थः साध्यशून्यायत्रपक्षस्तत्रसोबाधउदाहृतः उत्पत्तिकालीनघटेगंधादियत्रसाध्यते पक्षःपक्षतावच्छेदकविशिष्टइत्यर्थः तेनघटेगंधसत्वे
पिनक्षतिः एवंमूलावच्छिन्नोवृक्षःकपिसंयोगीत्यत्रापिबोध्यं इतिअनुमानेसमाप्यगमन् उपमितिमुत्पादयति ग्रामीणस्यभ्रमतःप
रंतोगवयादिकं सोदृश्यधीर्गवादीनायस्यात्साकरणंमता वाक्यार्थस्यातिदेशस्यस्मृतिव्यापारउच्यते गवयादिपदान्नातुशक्तिधीरुपमा
फले यत्रारण्यकेनकेनचिन् ग्रामीणायउक्तंगोसदृशोगवयइतिततोरण्यंगतस्यगोसदृशंपिंडंपश्यतस्तस्ययत्सादृश्यज्ञानंजायतेतदुप
मानं ततआरण्यकोपदिष्टातिदेशवाक्यार्थस्मरणंजायतेतदेवव्यापारः तदनंतरंगवयोगवयपदवाच्यइतिज्ञानंयत्जायतेतदुपमितिः नत्व
यंगवयपदवाच्यइत्यपमितिर्गवयांतरज्ञक्तिग्रहाभावप्रसंगात् इत्युपमितिः ज्ञाद्बोधंदर्शयति पदज्ञानंतुकरणंद्वारंतत्रपदार्थधीः ज्ञा
द्बोधः फलंतत्रशक्तिधीः सहकारिणी नतुज्ञायतेपदंकरणं पदाभावेपिमोनिश्रोकादौज्ञाद्बोधात् पदार्थधीरिति पदजन्यपदार्थस्मर
णव्यापारः अन्यथापदज्ञानवतः प्रत्यक्षादिनापदार्थोपस्थितावपिज्ञाद्बोधापत्तेः नचापिशब्दव्यापदजन्यसंबोध्यं अन्यथाघटादिपदात्समवा
यसंबंधेनआकाशस्मरणज्ञातेआकाशस्यापिज्ञाद्बोधापत्तेः शक्तिस्त्वशक्तिलक्षणान्यतरसंबंधः अतेवशक्तिज्ञानस्योपयोगः पूर्वशक्ति
ग्रहाभावेपदज्ञानेपितत्संबंधेनस्मरणानुपपत्तेः पदज्ञानस्यहिसंबंधिज्ञानविधयार्थस्मारकत्वं शक्तिश्चपदेनसहपदार्थस्यसंबंधः स
चास्माच्छब्दादयमर्थोबोध्यइतीश्वरेच्छारूपःआधुनिकैर्नाम्निशक्तिरित्यवहारनिर्वाहकतयाकल्पितानामकृष्णादितीश्वरेच्छायाः सत्वात् आधु
निकसंकेतेनशक्तिरितिमप्रदायः नव्यास्तु ईश्वरेच्छानशक्तिः किंतुईश्वरेवतेनआधुनिकसंकेतेपिशक्तिरस्तीत्याहुः शक्तिग्रहस्तुव्या
करणादितः तथाहि शक्तिग्रहव्याकरणोपमानकोशाप्तवाक्यव्यवहारतश्च वाक्यस्यशेषाद्विवृतेर्वदंतिसान्निध्यतः सिध्यपदस्यवृद्धाः
धातुप्रकृतिप्रत्ययादीनांशक्तिग्रहोव्याकरणात्भवति क्वचिच्चसतिबाधकेत्यन्यतेपियथावैयाकरणेराख्यातस्यकर्तरिशक्तिरुच्यते॥
चैत्रःपचतीत्यादौकर्त्रांशहचैत्रस्याभेदान्वयः तच्चगौरवान्यतेकिंतुलाघवात्कृतिश्चैत्रादेकारीभूयभासते नचकर्तुरन

मु० वं० १५

भिधानाच्चैत्रादिपदानंतरं तृतीयास्यादितिवाक्ये कर्त्रैसंख्यानभिधानस्यतत्रतंत्रत्वात् संख्याभिधानयोग्यस्वकर्मत्वाद्यनवरुधः प्रथमांतपदोपस्थाप्यकर्मत्वादित्यस्यइतरविशेषणत्वात्तुर्यादिविषयत्वमर्थः तेनैचैत्रइवगच्छतीत्यादौचैत्रादेर्वारणं स्तोकंपचतीत्यादौस्तोकादेर्वारणायद्वितीयदलं एवंव्यापारेपिनशक्तिर्भारवाहे। रथोगच्छतीत्यादावनुव्यापारआश्रयत्ववालक्षणा जानातीत्यादौत्वाश्रयते नयतीत्यादौतूद्देश्यतायोगित्वनिरूढलक्षणा उपमानादपियथाशक्तिग्रहस्तथाकः एवंकोशादपिशक्तिग्रहः सतिबाधकचित्परित्यज्यतेपियथानीलादिपदान्नीलरूपादीनांनीलादिविशिष्टेशक्तिः कोशेनत्युक्तितथापिलाघवात्नीलादीशक्तिर्नीलादिविशिष्टतुलक्षणा एवमाप्तवाक्यादपि यथाकोकिलः पिकपदवाच्यइतिआप्तोक्तात्पिकादिशब्देशक्तिग्रहः एवंव्यवहारादपियथाप्रसिद्धनकरधेनघटमानयेत्युक्तेनकुत्वाप्रयोज्यहेनघटआनीतःतदवधायपार्श्वेछोबालोघटनयनरूपंकार्यंघटमानयतिशब्दप्रयोज्यमित्यवधारयति ततश्च घटनयनमानयेत्यादिवाक्यादेवआवापोद्वापाभ्यांघटादिपदान्नाकार्यान्वितघटादौशक्तिंगृह्णातिइत्थंचभूतलेनीलोघटइत्यादिज्ञानाच्चबोधः घटादिपदानांकार्यान्वितघटादिबोधसामर्थ्यावधारणात् कार्यतावच्छेदकप्रतियोगितादीनांसामर्थ्यानदभावान्नज्ञानबोधइतिकेचित् तन्न प्रथमतः कार्यान्वितघटादौशक्त्यवधारणेपिलाघवेनपश्चात्तत्यपरित्यागोचित्यात् अतएवचैत्रपुत्रस्तेजातः कन्यातेगर्भिणीत्यादामुखप्रसादमालिन्याभ्यांस्फुटः सेअनुमायतत्कारणत्वेनपरिच्छेषाच्छब्दबोधेनिर्णीयतइतिनयातेनशब्दमवधारयति तथाचघटमिचानयेत्यादिकमध्याहार्यं मानाभावात्तदगौरवाच्च चैत्रपुत्रस्तेजातोमृतइत्यादौतदभावाच्च इत्थंचलाघवादन्विनघटपिशक्तिंत्यक्त्वाघटपदस्यघटमात्रेशक्तिमवधारयति एवंवाक्यशेषादपिशक्तिग्रहः यथाग्रवमयश्वरुभवतिइत्यत्रयवपदस्यहोर्घश्चकविशेषआर्याणांप्रयोगः कोगोतुल्यंछागानांतत्रहियत्नाच्चाओषधयोम्लायंतेअथैतेमोदमानाइवानिष्ठंति वसंतेसर्वसस्यानांजायतेपत्रशातने मोदमानाश्चतिष्ठंतियवाः कणिशशालिनइति वाक्यशेषादीर्घश्च केशक्तिर्निर्णीयते कोगोतुशक्तिभ्रमात्प्रयोगः नानाशक्तिकल्पनेगौरवात् हविषादोहादिविनिगमकाभावात् नानाशक्तिकल्पनं एवंविवरणादपिशक्तिग्रहः विवरणंतत्समानार्थकपदांतरेणतदर्थकथनं यथाघटोस्तीत्यत्रकलशोस्तीत्यनेनविवरणात् घटपदस्यकलशेशक्तिग्रहः एवंपचतीत्यस्यपाकंकरोतीत्यनेनविवरणात् आख्यातस्यत्यर्थकत्वकल्प्यते एवंसन्निधिपदस्यसामीप्यादपिशक्तिग्रहः यथासहकारतरोर्मधुरंपिकोरौतिइत्यादौपिकादिशब्दस्यशक्तिग्रहइतितत्रजातावेवशक्तिः नतुव्यक्तौव्यभिचारात् आनंत्याच्च व्यक्तीनांजातिभानस्यासंभवात् व्यक्तेरपिभानमितिकेचित् तन्न शक्तिंविनाव्यक्तिभानानुपपत्तेः नचव्यक्तौलक्षणा अनुपपत्तिप्रतिसंधानंविनापिव्यक्तिबोधात् नचव्यक्तिशक्तावानंत्यं सकलव्यक्तौएकस्यांवशक्तेः स्वीकारात् नचामनुगमः गोत्वादेरेवानुगमकत्वात् किंचेयंगोरयंगौरितिशक्तिग्रहोयदितदव्यक्तौशक्तिः यदितु गोत्वंशक्यमितिशक्तिग्रहः तदागोत्वप्रकारकपदार्थस्मरणंशब्दबोधश्चनस्यात् समानप्रकारकत्वेनशक्तिज्ञानस्यपदार्थस्मरणंशब्दबोधं प्रतिचहेतुत्वात् किंचगोत्वंयदिशक्तिः तदागोत्वत्वंशक्यतावच्छेदकंवाच्यं गोत्वत्वंतुगवेतरासमवेतत्वंसतिसकलगोसमवेतत्वंतथाचसकलगो

रम १५

33
1919

अश्वीयाशक्यतावच्छेदकेनुत्रवेशज्ञानेववैगौरवं तस्मात्तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्याकल्प्यमानाशक्तिर्नात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति शक्यपदं क्वचिच्चयौगिकं क्वचिद्रूढं क्वचिद्योगरूढं क्वचिद्यौगिकरूढंच अत्रैं अवयवार्थएवबुध्यतेतद्यौगिकं यथापाचकादिपदं। यत्रावयवशक्तिर्नसमुदायशक्तिमात्रेणबुध्यतेतद्रूढं यथागोपदंमंडपादिपदं यत्रतुअवयवशक्तिर्विषयसमुदायशक्तिरप्यस्तितद्योगरूढं। यथापंकजादिपदं तथाहिपंकजपदमवयवशक्त्यापंकजनिकर्तृरूपमर्थंबोधयति समुदायशक्त्याचपद्मत्वेनरूपेणपद्मंबोधयति नचकेवलावयवशक्त्याकुमुदेप्रयोगः स्यादितिवाच्यं रूढिज्ञानस्यकेवलयौगिकार्थज्ञानप्रतिबंधकत्वादितिप्राच्यैः वस्तुतस्तु समुदायशक्त्युपस्थितपंकजेअवयवार्थपंकजनिकर्तृत्वयोर्भवतिसान्निध्यात् यत्ररूढ्यर्थस्यबाधःप्रतिसंधीयतेतत्रलक्षणयाकुमुदादेर्बोधः यत्रतुकुमुदत्वेनरूपेणबोधेनतात्पर्यंपद्मत्वस्यचबाधः तत्रअवयवशक्तिमात्रेणनिर्वाहइत्याहुः यत्रतुस्खलपद्मादौअवयवार्थबाधःस्तत्रसमुदायशक्त्यापद्मत्वेनरूपेणबाधःयदितु स्खलपद्मंविज्ञातीयमेवतदालक्षणयेवेति यत्रतुयौगिकार्थरूढ्यर्थयोःस्तात्पर्येणबोधस्तद्योगिकरूढं यथाउद्भिदादिपदं अत्रहिउद्भेदकर्तृत्वंरुढ्यादिरपिबुध्यतेयागविशेषोपीति लक्षणाशक्यसंबंधइत्यादिगंगायांघोषइत्यादिगंगापदस्यशक्यार्थेप्रवाहरूपेघोषस्यान्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वायत्रप्रतिसंधीयते तत्रलक्षणयातीरस्यबोधः साचशक्यसंबंधः तथाहि प्रवाहरूपशक्यार्थसंबंधस्यतीरग्रहीतत्वात् तीरस्यस्मरणं।। ततः शाब्दबोधः परंतुयत्रान्वयानुपपत्तिर्लक्षणाबीजंस्यात् तदायष्ठीः प्रवेशयेदित्यत्रलक्षणानस्यात् यष्ठिप्रवेशान्वयस्यानुपपत्तेरभावात् ते नतत्प्रवेशभोजनतात्पर्यानुपपत्त्यायष्टिधैर्यलक्षणाएवंकाकेभ्यादधिरक्ष्यतामित्यादौकाकपदस्योपघातकत्वलक्षणा सर्वतादधिरक्षायाः तात्पर्यविषयत्वात् एवंछत्रिणोयांतिइत्यादौछत्रिपदस्यैकसार्थवाहित्वेनलक्षणाइयमेवअजहत्स्वार्थलक्षणेत्युच्यते एकसार्थवाहित्वेनरूपेणछत्रिनदन्वयबोधात् यदित्वन्वयानुपपत्तिर्लक्षणाबीजंस्यात् तदाकुचिद्गंगापदस्यतीरेकुचिद्घोषपदस्यमत्स्यादौलक्षणेनियमेनस्यात् इदंतुबोध्यंशक्यार्थसंबंधोयदितीरत्वेनरूपेणगृहीतस्तदातीरत्वेनरूपेणतीरबोधः यदितुगंगातीरत्वेनरूपेणगृहीतस्तदातेनैवरूपेणस्मरणं अतएवलक्ष्यतावच्छेदकेनलक्षणा तत्प्रकारकबोधस्यतत्रलक्षणाविनाप्युपपत्तेः परंतु एवंक्रमेणशक्यतावच्छेदकेपिशक्तिर्नस्यात् तत्प्रकारकशक्यार्थस्मरणंप्रतितत्पदस्यसामर्थ्यमित्यस्यस्फुटत्वात्तदितिविभावनीयं यत्रतुशक्यार्थस्यपरंपरासंबंधरूपालक्षणा सालक्षितलक्षणेत्युच्यते यथाहिरफादिपदेरफत्वसंबंधोभ्रमरपदज्ञायतेभ्रमरपदस्यचसंबंधोभ्रमरज्ञायतेनतत्रलक्षितलक्षणा किंतुलाक्षणिकंपदंनानुभावकं लाक्षणिकार्थस्यशाब्दबोधेतुपदांतरंकारणं शक्तिलक्षणान्यतरसंबंधेनेतरपदार्थान्वितस्वशक्यार्थशाब्दबोधंप्रतिपदानांसामर्थ्यावधारणात् वाक्येनुशक्तिरभारभावात् शक्यसंबंधस्यालक्षणापिनास्ति यत्रतुगंभीरायांनद्यांघोषइत्यत्रतुतत्रनदीपदस्यनदीतीरलक्षणा गंभीरपदस्यनद्यामहत्त्वयः क्वचिदेकदे

ज्ञानान्वयस्यापिस्वीकृतत्वात् यदित्वेकदेशान्वयोनस्वीक्रियतेतदानदीपदस्यगभीरनदीतीरलक्षणा गभीरपदंतात्पर्यग्राहकं वक्तव्यंतावप्येवं यत्रापि
चित्रगुरादौयद्येकदेशान्वयः स्वीक्रियते तदागोपदस्यगोसदृशलक्षणा गवि चित्राभेदान्वयः यदित्वेकदेशान्वयोनस्वीक्रियतेतदागोपदस्यचित्रगोसा
दृशलक्षणा तत्रचित्रपदंतात्पर्यग्राहकं एवंआरूढवानरोवृक्षइत्यत्रापिवानरपदंवानरारोहणकर्तृलक्षणा आरूढपदंतात्पर्यग्राहकं तत्पुरुषेतु
पूर्वपदलक्षणा तथाहि राजपुरुषादिपदंराजपदार्थेनपुरुषपदार्थस्यसाक्षान्नान्वयः निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वादन्य
थाराजापुरुषइत्यत्रापितथान्वयबोधस्यात् घटेनपटइत्यादौ घटपटपदाभ्यांनभः साक्षादेवअन्वयान्निपातातिरिक्तेतिनीलोघटइत्यादौनामार्थयोरभे
दान्वयादेवेति नचराजपुरुषइत्यादौतुभविभक्तेः स्मरणंकर्त्यमितिवाच्यं अस्मृतविभक्तेरपितातोबोधदर्शनात् तस्मात्राजपदंराजसंबंधिनि
लक्षणा तस्यचपुरुषेणसहाभेदः हृदंहतुधवस्वदिरोछिधीत्यादौधवःस्वदिरश्चविभक्त्यर्थहिंसनप्रकारकबुध्यनुकूलव्यापारलक्षणा ननुसाहित्यलक्षणेत्रा
स्तां साहित्यमन्यरूपंहृदंदण्डेनातनेचक्रक्रियान्वयित्वरूपंसाहित्यमस्तीतिवाच्यं क्रियाभेदेपिधवादिरोपस्यछिधीत्यादिदर्शनात् साहित्यस्याननु
भावाच्च राजपुरोहितोस्मान्त्यकामोयज्ञयातामित्यत्रलक्षणाभावात् हृदंश्रीयतेनतस्मात्साहित्यादिकंनार्थः किंतुवास्तवोभेदोयत्रतत्रहृदंः
ननुनीलघटयोरभेदइत्यादौकथमितिवाच्यं तत्रनीलपदस्यनीलत्वंघटपदस्यघटत्वंलक्षणा अभेदइत्यस्यचाश्रयाभेदइत्यर्थान समाहारहंहेतु
यदिसमाहारोप्यनुभयतइत्यभ्युपेयतेतदाअहिनकुलमित्यादौपरपदंअहिनकुलसमाहारेलक्षणा पूर्वपदंतात्पर्यग्राहकं नचभेदेमेदंगवादयेदित्य
नकथंसमाहारस्यान्वयः तस्यापेक्षाबुद्धिविशेषरूपस्यवादसंभवादितिवाच्यं साश्रयरात्तिलेनसंबंधेननदन्वयात् एवंपचपलीत्यादावपिपरंतु
अहिनकुलेइत्यादौ अहिर्नकुलश्चबुध्यते प्रत्येकमेकत्वान्वयः समाहारसंज्ञान्वयेत्वेकत्वेननघुसकनंचहृदंश्चप्राणितुर्यत्यादिसत्रेणाक्तत्रैवभन्य
त्रैकवचनमसाधुरित्याहुः । तंपरोभ्वश्रुरोइत्यादौपितृपरेजनकदंपत्योः स्वश्रूपदेनस्वश्रीजनकदंपत्योः लक्षणाएवमन्यत्रापि घटइत्यादौनलक्ष
णा घटत्वेनरूपेणनानाघटोपस्थितिसंभवात् कर्मधारयस्थलेतुनीलोत्पलमित्यादौ अभेदसंबंधेननीलपदार्थउत्पलमित्यादौ अभेदसंबंधेननी
लपदार्थउत्पलपदार्थंप्रकारः तत्रचनलक्षणा निषादस्थपतियाजयेदित्यत्रनतत्पुरुषेलक्षणापत्तेः किंतुकर्मधारयेलक्षणाभावात् नचनिषाद
स्थविशेषणेस्तुएवंकृत्यत्वात् लाघवेनमुख्यार्थान्वयेनतदनुपपत्याकल्प्यमानायाः फलमुखगौरवतयाअदोषत्वादिति उपकुर्भअधोषिप
लीत्यादौपरपदंतत्संबंधिनिलक्षणा पूर्वपदार्थप्रधानतयाचान्वयबोधइति उत्थंचसमासेनकापि पदशक्त्यवनिर्वाहादिति आसत्तिर्योग्यतेत्यादि
आसत्तिज्ञानंयोग्यताज्ञानं आकांक्षाज्ञानंतात्पर्याज्ञानंवाज्ञाब्दबोधेकारणं तत्रासत्तिपदार्थमाह संनिधानंत्विति अन्वयप्रतियोगिपदयोर
व्यवधानंआसत्तिः तदज्ञानंशाब्दबोधेकारणंकुचिद्व्यवहितेअव्यवधानभ्रमात् शाब्दबोधइतिकेचित् वस्तुतस्तु अव्यवधानज्ञानस्यापेक्षि

35
149

तत्वात् यत्पदार्थेनसहयत्पदार्थेमान्वयोपेक्षितस्तयोरव्यवधानेनोपस्थितिः कारणंतेनगिरिर्भुंक्तेअग्निमान्देवदत्तेनत्यादौअव्यवधानेनोपस्थि
त्यसंभवान्नशाब्दबोधः यत्रतुस्थलैकदेशेव्यवहितानोअव्यवधानेनोपस्थितिस्तत्रआसत्तिसत्त्वादेवान्वयबोधः इत्थंचासत्तेरुपस्थितिरूपत्वान्नवज्ञा
नस्याहेतुत्वात् आसत्तिभ्रमादपिशाब्दबोधाभावोपिनश्यति : तात्पर्यगर्भाचासत्तिः नीलोघटः इत्येवपटइत्यासत्तिभ्रमात्तुशाब्दबोधः आसत्तिभ्रमे
णशाब्दभ्रमाभावोपिनश्यति: ननुयत्रछत्रीकुंडलीवासस्वीदेवदत्तइत्याद्युक्तं तत्रउत्तरपदस्मरणेनपूर्वपदस्मरणस्यनाशादव्यवधानेनोपस्थितेर
संभवइतिचेन्न प्रत्येकंपदानुभवजन्यसंस्कारश्चरमतावद्विषयकस्मरणेव्यवधानेनोपपत्तेः नानासन्निकर्षेरेकप्रत्यक्षस्यवनानासंस्कारैरेकस्मरणो
त्पत्तेरपिसंभवात् तावत्पदसंस्कारसहितचरमवर्णज्ञानस्यहेतुत्वेकथमन्यथानानावर्णैरेकपदस्मरणं परंतुतावत्पदार्थानांस्मरणादेवस्व
स्वैकत्वेतात्पर्यात् तावत्पदार्थानांक्रियाकर्मभावेनान्वयरूपःशाब्दबोधोभवतीतिकेचित् वृद्धाश्युवान: शिशवःकृपानाःस्वैरयथाभीयुगपत्संतति॥
तथैवसर्वेयुगपत्पदार्थाः परस्परेणान्वयिनोभवंति परंतुयद्यदाकांक्षितंयोग्यंसन्निधानंप्रपद्यते तेनतेनान्वितःस्वार्थःपदैरवावगम्यते तथाच खेतु
वाक्यार्थबोधानंतरंतथैवपदार्थस्मृत्यामहावाक्यार्थबोधइत्याहुः एतेनतावद्वर्णाभिव्यंग्यः पदस्फोटोपिनिरस्तः तावद्वर्णसंस्कारसहितचरमवर्णो
पलक्षितपदजन्यतज्ज्ञानेनैवापपत्तिरितिदिङ्मात्रमुक्तं तत्रपिधेहीत्यादिपदस्यज्ञानादेवबोधः ननुपिधानाधिरूपार्थज्ञानात् पदजन्यतत्त
त्पदार्थोपस्थितेः तत्तच्छाब्दबोधेहेतुत्वात् किंचक्रियाकर्मपदानांतेनतेनैवसहसाकांक्षत्वात् तेनविनाकथंबोधःस्यात् तथापुष्पेभ्यइत्यादौस्पृह
यतीतिपदाध्याहारंविनाचतुर्थ्यनुपपत्तेः पदाध्याहारआवश्यकः योग्यतानिर्वक्ति पदार्थइति एकपदार्थअपरपदार्थसंबंधःयोग्यतेत्यर्थः ननु
ज्ञानाभावाच्चवह्निनासिंचेदितित्यादेर्नशाब्दबोधः ननुएतस्याः योग्यतायाःज्ञानेनशाब्दबोधात् प्राक्तत्संबंधेनसंभवति वाक्यार्थस्यअपूर्वत्वादिति
चेन्न तत्पदार्थस्मरणेमतिकश्चित्तन्नायरूपस्यकश्चिन्निश्चयस्यापियोग्यताज्ञानस्यसंभवात् नन्यास्तु योग्यताज्ञानेशाब्दज्ञानेकारणं वह्निनासि
चतीत्यादौतुसेकेवह्निकरणकत्वाभावरूपायोग्यतानिश्चयेनप्रतिबंधात् नशाब्दबोधः तदभावनिश्चयस्यलौकिकसन्निकर्षाजन्यदोषविशेषाज्ञा
न्यज्ञानमात्रेप्रतिबंधकत्वात् शाब्दंप्रत्यपिप्रतिबंधकत्वेसिद्धे योग्यताज्ञानविलंबाच्छाब्दविलंबोःसिध्यतीत्याहुः आकांक्षानिर्वक्ति यत्पदेनत्या
दिना येनपदेनविनायत्पदस्यअन्वयाननुभावकत्वंतेनतस्यआकांक्षत्यर्थः क्रियापदंविनाकारकपदानान्वयबोधउन्नयतीतितस्याकांक्षा व
स्तुतस्तु क्रियाकारकपदानांसन्निधानमात्मत्याचरितार्थं परंतुघटकर्मतावोधंप्रतिघटपदोत्तरंद्वितीयाश्रुताकांक्षाज्ञानंकारणं तेनघटः कर्म
त्वमानयनंक्रतिः इत्यादौनशाब्दबोधः अयमतिथिर्नराज्ञः पुरुषोपसार्यतामित्यादौपुत्रेणसहराजपदस्यतात्पर्यग्रहात् तेनैवान्वयबोधः पुरु
षेणसहतात्पर्यग्रहेतुतेनसान्वयः स्यादेव तात्पर्यनिर्वक्ति वक्तुमिच्छति यदितात्पर्यज्ञानंकारणंनस्यात् तदासंधवमानयेत्यादौकश्चिदश्वस्यक

चित्त्वगणस्य बोधइतिनियमोनस्यात् नचतात्पर्यग्राहकाणांप्रकारणादीनांशाब्दबोधैकारणमस्त्विति वाच्यं तेषामनुगमात् तात्पर्यज्ञानजनक
त्वेनतेषामनुगमेतुतात्पर्यज्ञानमेवलाघवात्कारणमस्तु इत्थंचवेदस्यतात्पर्यज्ञानार्थमीश्वरः कल्प्यते नचतत्रअध्यापकतात्पर्यज्ञानेकारणमिति
वाच्यं सर्गादावध्यापकाभावात् नचप्रलय एवनास्तिकुतः सर्गादिरितिवाच्यं प्रलयस्यागमप्रतिपाद्यत्वात् इत्थंमन्वादिकेयुक्तवाक्येपिईश्व
रतात्पर्यज्ञानेकारणंविसंवादिशुक्लवाक्येतुनिश्चयितुरेवतात्पर्यज्ञानस्यकारणं अन्यत्तु नानार्थादिकंचिदेवतात्पर्यज्ञानकारणं तथाचशुक्लवा
क्येविनैवतात्पर्यज्ञानंशाब्दबोधः वदेतु अनादिर्मीमांसापरिशोधितस्तर्कः अर्थोवधार्यतेइत्यादुः पूर्वमनुभवस्मरणभेदात् बुद्धेर्द्वैविध्यमुक्तंतत्र
अनुभवप्रकाराः दर्शिताः स्मरणमयास्मरणेनदर्शितं तत्रहिपूर्वानुभवाः कारणं अत्रकेचित् अमुभूवत्वेननकारणत्वंकिंतुज्ञानत्वेन अन्य
थास्मरणानंतरस्मरणंनस्यात् समानप्रकारस्मरणेनपूर्वसंस्कारस्यविनष्टत्वात् मन्मतेनुस्मरणेनतेनैवसंस्कारांतरद्वारास्मरणानंतरजन्यतद्वद्या
दुः नन्वयंसमूहालंबनोत्तरंघटपटादीनांक्रमेणस्मरणंआजन्मिष्ट सकलविषयकस्मरणंनाभूत् तत्फलस्यसंस्कारानाशकत्वाभावात् कालस्यो
चरमफलस्यवासंस्कारनाशकत्वंतुथानैकमिकस्मरणानुपपत्तिः नचपुनःपुनःस्मरणात् दृढतरसंस्कारानुपपत्तिः स्मृत्यैक्यसमवधानस्यरा
द्धपदार्थत्वात् नचविनिगमनाविरहेदंवज्ञानत्वेनापिज्ञानकारणत्वंस्यादितिवाच्यं विशेषधर्मेण्यभिचारज्ञानसामान्यधर्मेणअन्यथासिद्धत्वात् कथमन्य
थादृष्टस्यभूमिहारादृष्टत्वेनरूपेणकारणत्वं नचआंतरालिकस्मरणानांसंस्कारनाशकत्वसंशयात् व्यभिचारसंशयइतिवाच्यं अनंतसंस्मारत
नाशकत्वनापत्याचरमस्मरणस्यैवसंस्कारनाशकत्वकल्पनेनव्यभिचारसंशयाभावात् इदानींक्रमप्राप्तमेनोनिरूप्यते साक्षात्कारेसुखादीनांकर
णमनुच्यते एतेनमनसिक्रियमाणंदर्शितं तथाहि सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात् चाक्षुषसाक्षात्कारवत् इत्यनुमानेनमनसः
करणत्वसिद्धेः नचेदंदुःखादिसाक्षात्काराणामपिकरणांतराणिस्युरितिवाच्यं लाघवादेकस्यैवसकलसाक्षात्कारकरणतयासिद्धेः एवंसुखादीनां
असमवायिकारणंसंयोगाश्रयत्वयामनसः सिद्धिर्बोध्या मनसोऽणुत्वंप्रमाणमाह अयोगपद्याज्ज्ञानानांतस्याणुत्वमिहोच्यते ज्ञानानांचाक्षुष
रासनादीनांअयोगपद्यं एतत्कालपत्तिर्नास्तीत्यनुभवसिद्धं तत्रनानेंद्रियाणांसत्यपिविषयसन्निधानेयत्संबंधादेकेंद्रियेणज्ञानमुत्पाद्यते तदसंब
धाच्चत्वगादिभिः घटेज्ञानंनोत्पद्यतेतन्मनसोविभुत्वेचअसन्निधानेनसंभवतीतिनुविभुमनः नचतदानीमदृष्टविशेषाद्बाधकविलंबादवत्तज्ज्ञानति
लंबइतिवाच्यं तथासतिचक्षुरादीनामपिअकल्पनापत्तेः नचक्षुरींद्रियाणांचक्षुलींभक्षणादीनानावधानभाजांकथमेकदानानेंद्रियजन्यज्ञानापत्तिरितिवा
च्यं मनसोतिलाघवादितिनानेंद्रियसंबंधेनानाज्ञानोत्पत्त्यदर्शनात् उत्पत्तिज्ञानपर्यंतादाविंद्रियागपद्यप्रत्ययस्यभ्रांतत्वात् नचमनसः संकोचविका
सशालित्वादुभयोपपत्तिरितिवाच्यं नानावयवत्वाशादिकल्पनेगौरवात् लाघवात्तन्निरवयवस्यैवाणुरूपस्यमनसः कल्पनादितिसंक्षेपः इति
द्रव्यपदार्थंनिरूप्यसमाप्तं इदानींनिरूप्यगुणान्निरूपयति अथद्रव्याश्रिताअनेयानिर्गुणानिक्रियागुणाः गुणत्वजातेःकिंमानमितिचेदुद्दिष्टद्रव्यक

37
1919

र्मभिन्नेसामान्यवृत्तियाकारणतासाकिंचिद्धर्मावच्छिन्ननिरवच्छेद्यकारणतायाअभावात् नहिरूपत्वादेकंसत्तावत्तावच्छेदिकान्यूनातिरिक्तदेशवृत्ति
त्वात् अतश्चदुर्वचत्वमनुगतंवाच्यं तदेवगुणत्वमिति इत्याश्रितइति यद्यपिद्रव्याश्रितत्वंनलक्षणैकदेशावलिव्याप्तेः तथाचद्रव्यत्वव्याकतावच्छेद
कसत्ताभिन्नजातिमत्त्वंतदर्थः भवतिहिगुणत्वंद्रव्यत्वव्यापकतावच्छेदकंतद्भिन्नाचगुणानामिति द्रव्यत्वकर्मत्ववान्द्रव्यत्वव्यत्वव्यापकतावच्छेदकंगय
नादेर्द्रव्यकर्मणोरभावात् द्रव्यत्वंसामान्यत्वादिकंवानजातिरितिनदोषः निर्गुणाइति निर्गुणत्वंकर्मादावपितथा सामान्यवत्त्वंकर्मान्यत्वेनसवि
निर्गुणत्वंबोध्यं ज्ञानत्वादिकंनसामान्यवत् कर्मणोनकर्मान्यत्वं द्रव्यस्यनिर्गुणत्वंइतिनातिव्याप्तिः निष्क्रियाइति स्वरूपकथनंनतुल्यलक्षणं गगनादा
वतिव्याप्तेः रूपरसस्पर्शगंधापरत्वमपरत्वंद्रवत्वस्नेहवेगधर्माधर्मभावनाशब्देबुध्यादयश्चैतेमूर्त्तगुणाः स
र्वेदृष्टिपरिकीर्तिताः संख्यादिश्चविभागांतउभयेषांगुणोमतः मूर्त्तगुणाइति अमूर्त्तेषुनवर्त्ततेइत्यर्थः उभयेषामिति मूर्त्तामूर्त्तगुणाइत्य
र्थः मूर्त्तेवृत्तिरिति अमूर्त्तवृत्तिगुणत्वव्याप्यजातिमत्त्वंतत्तं संख्यात्वादिकमादायलक्षणसमन्वयः संयोगश्चविभागश्चसंख्यादिस्वादिकान्त
था द्विपृथक्त्वादयश्चान्तद्वंद्वेनैकाश्रितागुणाः संयोगविभागद्विपृथक्त्वादीनिद्विवृत्तीनि त्रित्वंत्रयाणुश्चादिकंत्रिचतुरादिवृत्तीनिबोध्यं अतःत्रि
षगुणाः सर्वेमूर्ताएकैकवृत्तयः रूपरसगंधस्पर्शसंख्यापरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्काराद
र्शनाख्यास्त्रयोदशेत्यर्थः बुध्यादिपदंकिमर्थंतानाः स्नेहः सांसिद्धिकोद्रवः अदृष्टभावनाख्याअमीवैशेषिकागुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाइत्यर्थः
स्पर्शवतइति रूपरसगंधस्पर्शादित्यर्थः द्रवःइत्यत्र विशेषादवंवैशेषिकाः स्वार्थेठक् विशेषगुणाइत्यर्थः संख्यादिपरत्वांतद्रवांसांसिद्धिनै
मित्तिकत्वया गुरुत्ववेगौसामान्यगुणाएतत्पदकीर्तिताः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वमित्यर्थः संख्यापरत्वांतद्रवत्वस्ने
हएवच एतेतुहींद्रियग्राह्याः चक्षुषात्वचापियहणयोग्यत्वा अथस्पर्शांतशब्दकाः बाह्येकेंद्रियग्राह्याः स्पर्शादीनांचक्षुरादिनाग्राह्य
त्वात् गुरुत्वद्रवभावनाः अतींद्रियाविभूतयेस्पर्शवैशेषिकागुणाः अकारणगुणात्यन्तानेतुपठिताकीर्तिताः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्म
धर्मभावनाख्याइत्यर्थः कारणगुणपूर्वकाःस्युरितिवक्ष्यंते बुध्यादयस्तुनतादृशाः आत्मादेःकारणाभावात् अपाकजस्तुस्पर्शोनाद्रव
त्वेनचेत्याविधं स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकं स्थितिस्थापकंइत्येतत्स्पर्शः कारणगुणाद्वाः पाकजरूपादिनाकारणगुणपूर्वत्वाभावात् अ
पाकजाइत्यर्थः तथाविधमपाकजं संयोगश्चविभागश्चवेगश्चेनेतुकर्मजाः कर्मजत्वंचयद्यपिनसाधर्म्यंघटादावतिव्याप्तेः संयोगजसंयोगेव्याप्ति
श्चनथापिकर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वंबोध्यं एवमन्यत्रापिकचिद्दृश्यंस्पर्शं स्पर्शगतपरिमाणैकपृथक्त्वस्नेहशब्दैके भवेदसमवायित्व
घटादिरूपसमवेतधर्मस्पर्शाः कपालादिरूपसमवेतधर्मस्पर्शेभ्योभवति एवंकपालादिपरिमाणादीनांघटादिपरिमाणाद्यसमवायिकारणत्व शब्दस्यापि
दृश्यशब्दं प्रतितत्त्वमिति एवंस्थितिस्थापकत्वयोरपिज्ञेयं अथवैशेषिकगुणे आत्मनःस्वाश्चिमित्तत्वं बुध्यादीनामिछादिनिमित्तत्वादितिभाव उ
क्तस्पर्शगुरुत्वयोः वेगपिचद्रवत्वेचसंयोगादिदृश्यतथाद्विपृथक्त्वकारणत्वस्यात् असमवायिकारणत्वंनिमित्तकारणत्वं च तथाहि उक्तस्पर्शउ

स्पर्शस्यासमवायिकारणं पाकजनिमित्तं पाकजरूपेऽनुष्णस्पर्शस्यनिमित्तत्वं गुरुत्वपतनयोरसमवायि प्रतिघातेनिमित्तं वेगोवेगस्यैदयोरसमवायि अभिघातेनिमित्तं द्रवत्वंद्रवत्वस्यैदयोरसमवायि संयोगेनिमित्तमभिघातस्यैदंसंयोगः शब्देनिमित्तं भेर्याकाशसंयोगः असमवायि वेशब्दत्वद्वयविभागः शब्देनिमित्तंवेशब्दत्वाकाशविभागः असमवायि अथप्रादेशिकोभवन् वेशेषिकोविशेषगुणः संयोगादिदृष्टंतथा प्रादेशिकः अध्याहृतिः चक्षुर्ग्राह्यभवद्रूपं रूपत्वजातिमद्रूपशब्दोल्लेखवतीप्रतीतिर्नास्मिन्निति चेत्तमास्म रूपशब्दप्रयोगः तथापिनीलपीताद्यनुगतजातिविशेषानुभवसिद्धः रूपशब्दप्रयोगेपिनीलोवर्णः पीतोवर्णइतिवर्णशब्दोल्लेखिनीप्रतीतिरस्त्येव एवंनीलत्वादिकमपिप्रत्यक्षसिद्धं नेच्छेत्कः रूपादिव्यक्तयः इत्यंकव्यक्तिवृत्तित्वात् नीलत्वादिकं नजातिरितिवाच्यं नीलोनष्टोरक्तोउत्पन्नइत्यादिप्रतीतेर्नीलादेरुत्पादविनाशान्यथानुपपत्तेर्यथानानात्वात् अन्यथाएकनीलनाशेजगदनीलमापद्येत नचनीलसमवायस्यरक्तसमवायस्यवाविनाशात्पादविषयकः प्रत्ययइतिवाच्यं प्रतीत्यासमवायानुच्छेदात्॥ नचसएवायंनीलइतिप्रत्यक्षात्प्रत्यभिज्ञानाद्ध्रुवोंशेक्यमितिवाच्यं प्रत्यक्षस्यतज्जातीयविषयत्वात् सेवेयंगुर्जरीतिवत् तत्राध्रुवंतुप्रत्यक्षबाधितं अन्यथाघटादीनामप्येकत्वप्रसंगात् युत्पादविनाशवुद्धेः समवायांतरनिमित्तत्वमितिचेत् एतेनरसादिकं व्याख्यातं चक्षुर्ग्राह्यमितिचक्षुर्ग्राह्यविशेषगुणइत्यर्थः एवमपिद्रव्यादेरुपलंभकं उपलब्धिकारणं इदमेवचित्रंगुणीतिचक्षुषः सहकारीस्यात् द्रव्यगुणकर्मसामान्यानांचाक्षुषप्रत्यक्षंप्रतिउद्भूतरूपंकारणं शुक्लादिकमनेकधा तद्रूपंतुशुक्लनीलपीतकपिशकबुरादिभेदात् बहुधाभवति ननुकबुरंकथमितिचित्ररूपं इत्यनीलपीताद्यारब्धावयवीन तावन्नीरूपः अप्रत्यक्षत्वप्रसंगात् नापिव्याप्यवृत्तिनीलरूपमुत्पद्यते पीतावच्छेदेनापिनोलोपलब्धिप्रसंगात् नाव्याप्यवृत्तिनीलादिरूपमुत्पद्यते व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वविरोधात् तस्मान्नानाजातीयरूपेरवयवैर्विजातीयंचित्ररूपमारभ्यते अतएवएकंचित्रमितिअनुभवोपिनानारूपकल्पनेगौरवात् इत्यंचगीलादीनांपीताद्यारंभप्रतिबंधकल्पनादवयविनिनपीताद्युत्पत्तिः एतेनस्पर्शोपिव्याख्यातः रसादिकमपिनाव्याप्यवृत्ति किंतु नानाजातीयरसद्रव्यसंयोगेशरीरावयवेरसाभावेपिनक्षतिः तत्ररसनयाअवयवेरसएवगृह्यते रसनेंद्रियानोद्रव्यग्रहेसामर्थ्याभावात् अवयवनिनीरसत्वेपिक्षतेरभावात् जलादिपरमाणोस्तन्नित्यमन्यत्सहेतुकं जलपरमाणोस्तेजपरमाणोश्चरूपंनित्यंपृथिवीपरमाणुरूपंनुनित्यं तत्रपाकेनरूपांतरोत्पत्तेः नहिघटस्यपाकानंतरंतदवयवोः पक्वउपलभ्यते नहिरक्तकपालस्यकपालिकानीलंभवति एवंकर्मणपरिमाणावपिपाकःसिध्येत् अन्यत्तजलपरमाणुतेजःपरमाणुरूपन्नेभिरूपं सहेतुकं नित्यंरसनिरूपयति रसस्तुरसनग्राह्योमधुराद्यनेकधा सहकारीरसनायाः रसनज्ञानेरसःकारणमित्यर्थः नित्यत्वादिनृपूर्ववत्तु जलपरमाणोरसोनित्यः अन्यःसर्वोप्यनित्यइत्यर्थः गंधंनिरूपयति घ्राणग्राह्योभवद्गंधोघ्राणस्येवोपकारकः सौरभ्यासौरभ्यचलत्वेदधापरकीर्तितं घ्राणजन्यज्ञानेकारणमित्यर्थः सर्वोपिगंधोअनित्यएव स्पर्शोनिरूपयति स्पर्शस्त्वगिंद्रियग्राह्यस्त्वचः स्याद्गुपकारकः अनुष्णाशीतशीतोष्णभेदात्सन्निधानतः काठिन्यादिस्तावदेवस्पार्शनप्रत्यक्षेस्पर्शः कारणमित्यर्थः पृथिव्यापोयोश्चस्पर्शोनुष्णाशीतः जलस्यशीतः तेजसउष्णः कठिनस्तुकुमारस्पर्शोपृथिव्या

एवेत्यर्थः कठिनस्तावत्किंचनसंयोगतोज्ञातिविशेषः चक्षुर्ग्राह्यतापत्तेः नित्यतादिचपूर्ववत् जलतेजोवायुपरमाणुस्पर्शाः नित्याः तद्भिन्नास्त्वनित्याएवेत्यर्थः एतेषांपाकजत्वंतुक्षितौनान्यत्रकुत्रचित् तत्रापिपरमाणोस्यात्पाकोवैशेषिकमतेपृथिव्यांहिरूपरसगंधस्पर्शापरावृत्तिः पाकसंयोगादुपलभ्यते नहिशतधापिध्मायमानेजलेरूपादिकंपरावर्त्तते नीरसोरभमोष्णंचान्वयव्यतिरेकाभ्यामुपाधेरेवेतिनिर्णीयते पवनपृथिवीः शीतस्पर्शादिवत् तत्रापिपृथिवीमध्यपरमाणावेवपाकइतिवैशेषिकावदंति तेषामयमाशयः अवयविनाअवष्टब्धेषुअवयवेषुपाकोनसंभवतिपरंतुबह्निसंयोगनाशवयविष्वविनष्टेषुस्वतंत्रेषुपरमाणुषुपाकः पुनश्चपाकपरमाणुसंयोगात् द्व्यणुकादिक्रमेणपुनर्महावयविपर्यंतमुत्पत्तिः तेजसामतिशायितवेगवत्त्वात्पूर्वव्यूहनाशात्प्रतिव्यूहांतरोत्पत्तिरस्तीति अथद्व्यणुकादिनाशमाश्रित्यकतिभिःक्षणैघटनरुत्पत्तिरादिमद्वतीतिविष्णुबुद्धिवेद्यायप्रक्रिया तत्रविभागजविभागानंगीकारेनक्षणानंगीकारेविभागः किंचित्सापेक्षोविभागंजनयेत् निरपेक्षस्यतत्रैकमंत्यंस्यात् तत्रयदिद्व्यारंभकसंयोगविनाशकविशिष्टंकालमपेक्ष्यविभागंजविभागस्यात् तदादशलक्षणा अथद्व्यनाशविशिष्टंकालमवयवैर्वाअपेक्षतेतदाएकादशलक्षणा तथाहिवह्निसंयोगात्परमाणोःकर्म परमाण्वंतरेणविभागः ततश्चारंभसंयोगनाशः ततोद्व्यणुकनाशः ततः परमाणोश्यामादिनाशः ततःरक्तादुत्पत्तिः ततोद्व्यारंभानुगुणक्रियातोविभागः ततः पूर्वसंयोगनाशः ततः आरंभकसंयोगनाशः ततोद्व्यणुकारब्धस्योत्पत्तिः ततोस्यादुत्पत्तिः ननुश्यामादिनाशक्षणेरक्तोत्पत्तिक्षणेवापरमाणोर्द्व्यारंभानुगुणक्रियास्तिचेन्न अग्निसंयोगात्परमाणोर्यत्कर्मतद्विनाशमंतरेणगुणोत्पत्तिमंतरेणचपरमाणोक्रियांतराभावात् कर्मैवतिक्रमेवृतिकर्मोत्तरानुत्पत्तेः निर्गुणद्रव्येद्व्यारंभानुगुणक्रियानुत्पत्तेश्च तथापिपरमाणोश्यामादिनिवृत्तिसमकालंरक्तादुत्पत्तिः स्यादितिचेन्न पूर्वरूपादिध्वंसस्यापिरूपांतरहेतुत्वात् अथदशलक्षणा साचआरंभकसंयोगविनाशविशिष्टंकालमपेक्ष्यविभागेनविभागंजननेसतिस्यात् तथाहि वह्निसंयोगाद्द्व्यणुकारंभकपरमाणोःक्रिया ततोविभागः ततआरंभकसंयोगनाशः ततोद्व्यणुकनाशःविभागजविभागो ततःश्यामनाशःपूर्वसंयोगनाशोनतोरक्तोत्पत्तिरततउत्तरसंयोगः ततोद्व्यणुकोत्पत्तिः अथरक्तोत्पत्तिः अथैकादशलक्षणा वह्निसंयोगात्परमाणोःकर्मततोविभागः ततोद्व्यारंभकसंयोगनाशः ततोद्व्यणुकनाशः ततोद्व्यणुकनाशविशिष्टंकालमपेक्ष्यविभागविभागश्यामनाशोनतः पूर्वसंयोगनाशरक्तोत्पत्ती ततउत्तरसंयोगः ततःक्रियानाशः ततःकर्मणक्रियाविभागपूर्वसंयोगनाशः ततोद्व्यारंभकसंयोगः ततोद्व्यणुकं ततोरक्तादि मध्यमशब्दवदेकस्मादग्निसंयोगान्नरूपनाशोत्पादोनावत्कालमेकस्यानेकस्थत्वात् किंचयद्व्यादिकोनाशकस्तदानष्टेरूपादावग्निनाशनिरूपश्चिरंपरमाणुःस्यात् नाशकश्चेदुत्पादकस्तदारक्तोत्पत्तौतदग्निनाशरक्ततरतानुस्यात् परमाण्वंतरेकर्मचिंतनात्संयमादिक्षणेपिगुणोत्पत्तिः तथाहि एकत्रपरमाणोःकर्मततोविभागः ततोआरंभकसंयोगनाशपरमाण्वंतरकर्मणी ततोद्व्यणुकनाशपरमाण्वंतरकर्मजश्चविभागइत्येकः कालःततः श्यामादिनाशः

पूर्वसंयोगनाशः इत्येकः कालः ततोरक्तोत्पत्तिइत्यारंभकसंयोगइत्येकः कालः अथद्व्यणुकोत्पत्तिः अथरक्तोत्पत्तिरित्येवंपंचक्षणा इयमना
शसमकालंपरमाण्वंतरेकर्मचिंतनात षष्ठगुणोत्पत्तिः तथाहि परमाणुकर्मणापरमाण्वंतरविभागः ततआरंभकसंयोगनाशः ततोद्व्यणुकनाश
परमाण्वंतरकर्मणी अथश्यामनाशपरमाण्वंतरकर्मजविभागश्च ततोरक्तोत्पत्तिः परमाण्वंतरेपूर्वसंयोगनाशश्च ततः परमाण्वंतरसंयोगः
ततोद्व्यणुकोत्पत्तिः एवंश्यामनाशक्षणेपरमाण्वंतरेकर्मचिंतनात्सप्तमक्षणा तथाहि परमाणोकर्मपरमाण्वंतरेणविभागः ततआरंभकसंयोगना
शः ततोद्व्यणुकनाशः ततःश्यामादिनाशपरमाण्वंतरकर्मणी रक्तोत्पत्तिविभागौ संयोगनाशः उत्तरसंयोगनाशः द्व्यणुकोत्पत्तिः ततोरक्तो
त्पत्तिः रक्तोत्पत्तिसमकालेपरमाण्वंतरेकर्मचिंतनात अष्टक्षणाइति तथाहि अग्निसंयोगात् एकस्मिन्परमाणोकर्मततः परमाण्वंतरेणविभा
गः ततआरंभकसंयोगनाशः ततोद्व्यणुकनाशः ततः परमाणोश्यामनाशः ततोरक्तोत्पत्तिः परमाण्वंतरकर्मणीततः परमाण्वंतरेपूर्ववदेशेनसाकं
कर्मजोविभागः ततः पूर्वदेशसंयोगनाशः ततआरंभकसंयोगोत्पत्तिः ततोद्व्यणुकं ततोरूपं नैयायिकानांतुनयेद्व्यणुकादावपीष्यते नय्यायि
कानामतेद्व्यणुकादौ अवयविन्यपिपाकोभवति तेषामयमाशयः अवयविनामछिद्रत्वाद्रूक्षः सूक्ष्मावयवैः अंतर्विष्टैरवयवैर्बहवश्चोर्ध्वपि
पाकोनुविरुध्यते अनंतावयविन्यनाश्रयत्वेनोर्ध्वत्वं इत्थंचसोयंघटइत्यादिप्रत्यभिज्ञायतुनप्रत्यभिज्ञातव्यविनाशेपीत्युक्तंभवति॥
संख्यांनिरूपयितुमाह गणनव्यवहारेतु हेतुः संख्याभिधीयते नित्येष्वनित्येषुचसमवेतत्वमनित्येः नित्यमिष्यते गणनव्यवहारसाधारणकारणंसंख्येत्य
र्थः नित्येषुपरमाण्वादिषुएकत्वंनित्यं अनित्येघटादावनित्यमेकत्वमित्यर्थः द्वित्वादयः परार्धांताअपेक्षाबुद्धिजामताः द्वित्वादयोव्यासज्यव
र्त्तिसंख्याः अपेक्षाबुद्धिजन्याः अनेकाश्रियपर्यंतेनुपरिकीर्तिताः यद्यपिद्वित्वादिकंप्रत्येकंघटादावपिवर्त्तते तथाप्येकोह्यादिति प्रत्ययाभा
वात् एकोनेहा इतिप्रत्ययस्यद्व्यादीनांपर्याप्तिलक्षणः कश्चनसंबंधोनेकाश्रयोभूपेयते अपेक्षाबुद्धिनाशाच्चतेषांनाशो निरूपितः॥
प्रथममपेक्षाबुद्धिस्ततोद्वित्वोत्पत्तिः ततोविशेषणज्ञानंद्वित्वनिर्विकल्पकात्मकं ततोद्वित्वविशिष्टप्रत्यक्षसमपेक्षाबुद्धिनाशश्च ततोद्वित्व
नाशइति यद्यपिज्ञानांतरंद्वित्वेक्षणमात्ररूपापि योग्यविभुविशेषगुणानांस्वोत्तरवर्त्तिगुणनाश्यत्वात् तथाप्यपेक्षाबुद्धिस्त्रिक्षणावस्थायिनीकल्प्य
ते अन्यथानिर्विकल्पकंकालेपेक्षाबुद्धिनाशात् अनंतरंद्वित्वस्यनाशःस्यात् नतुद्वित्वप्रत्यक्षंतदानींविषयाभावात् विद्यमानस्यैवज्ञानकारणत्वा
ज्ज्ञाननाशनोपगमात् तस्मात्तद्वित्वप्रत्यक्षादिकमपेक्षाबुद्धिनाशकल्प्यते नचापेक्षापेक्षाबुद्धिनाशात् कथंद्वित्वनाश इतिवाच्यं कालांतरद्वित्वप्र
त्यक्षाभावादपेक्षाबुद्धिस्तदुत्पादिकातन्नाशस्तन्नाशकः कल्प्यते अतएवतत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकंतेनैवगृह्यतइतिकल्प्यते नचापेक्षा
बुद्धेः द्वित्वप्रत्यक्षकारणत्वमस्तितिवाच्यं लाघवेनद्वित्वंप्रतिकारणत्वस्यैवोचितत्वात् अतोद्वित्वद्व्यणुकादौ अपेक्षाबुद्धियोगिनो सर्गादिकालीन
परमाण्वादौईश्वरीयापेक्षाबुद्धिः ब्रह्मांडांतरावर्त्तियोगिनामपेक्षाबुद्धिर्वाद्वित्वादिकारणमिति अपेक्षाबुद्धिः केत्यत आह अनेकेति अयमेकः अय
मेकः इत्याकारिकेत्यर्थः परिमाणंनिरूपायति परिमाणमिति परिमितव्यवहारासाधारणकारणंपरिमाणमित्यर्थः तच्चतुर्विधं अणुमाहदीर्घं

41
1919

हृस्वंचेतितत्परिमाणं नित्यमित्यत्रपरिमाणमित्यनुषज्यते आद्यतइत्यत्रापिपरिमाणमित्यनुवर्त्तते अनित्यमितिपूर्वेणान्वेति तथात्वानित्यपरि
माणंसंख्याजन्यंपरिमाणजन्यंप्रचयजन्यंचेत्यर्थः तत्रसंख्याजन्यमुदाहरति द्व्यणुकत्रसरेणुपरिमाणंप्रतिपरमाणुपरिमाणं द्व्यणुकपरिमाणंवा
नकारणं परिमाणस्यस्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् द्व्यणुकस्याणुपरिमाणंतुपरिमाण्वणुत्वापेक्षयानोत्कृष्टं त्रसरेणुपरिमाणंवुन
र्नजातीयं अतःपरमाणोर्द्वित्वसंख्याद्व्यणुकपरिमाणस्यद्व्यणुकत्रित्वसंख्याच्चत्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः परिमाणजन्यमुदा
हरति परिमाणंघटादाविति घटादिपरिमाणंकपालादिपरिमाणजन्यंप्रचयजन्यमुदाहर्त्तुंप्रचयंनिर्वक्ति प्रचयइतिनाशइति अर्थात्परिमाणस्य
एथक्त्वंनिरूपयति संख्यावदिति एथक्त्वप्रत्ययासाधारणंकारणंएथक्त्वं नित्यतादिकंसंख्यावत् तथाहि नित्येष्वेकंनित्यमनित्ये अनित्यमेकत्वं
आश्रयस्तेचउच्यंते आश्रयनाशान्नश्यति तथाएकएथक्त्वमपिद्वित्वादिवत् द्विएथक्त्वादिकमपीत्यर्थः ननुअयमस्मात्एथगित्यादौ अन्योन्या
भावोभासतेतत्कथंएथक्त्वंगुणांतरं स्वीक्रियते नचएथक्त्वमेवास्तु नत्वन्योन्याभावइतिवाच्यं रूपेणघटइतिप्रत्ययानापत्तेः नहिरूपघटावधिकंए
थक्त्वंगुणांतरमस्तिनचघटेघटावधिकंएथक्त्वमिति येनपरंपरासंबंधः कल्प्यतेउच्यतआह अन्योन्याभावइति विलक्षणेति ननुगोश्चवैलक्षण्य
मेवनत्वर्थवैलक्षण्यमितिचेन्न विनार्थभेदंकेघटात्एथगितिवत् घटोनेत्यत्रापिपंचमीप्रसंगात् तस्माद्यदर्थकयोगेपंचमीसोर्थोन अर्थान्योन्या
भावतोभिन्नोगुणांतरंकल्प्यतइति संयोगंनिरूपयति अप्राप्तयोरिति तंविभजंते कीर्त्तितइति एषःसंयोगः द्वितीयउभयकर्मजः तृतीयइतिसंयो
गजइत्यर्थः तृतीयःस्यादितिपूर्वेणान्वितं आदिमःअभिघातः द्वितीयःनोदनाख्यः विभक्तप्रत्ययासाधारणंकारणं विभागंनिरूपयति विभाग
इति एकंकर्मेति उदाहरणंतुप्रयत्नेनोह्यं विभागादिकंपूर्ववत्बोध्यं तृतीयविभागजः कारणमात्रविभागजन्मुः कारणाकारणविभागजन्यश्चे
ति आद्यस्तावद्द्व्यणुकंकपालेकर्मततः कपालद्वयविभागः ततः घटारंभकसंयोगनाशः ततः घटनाशः ततस्तेनैवकपालविभागेनसकर्मणः
कपालस्याकाशादिविभागोजन्यते ततआकाशादिसंयोगनाशः उत्तरदेशसंयोगः ततः कर्मनाशइति नचतेनैवकर्मणा कथंदेशांतरविभा
गोजन्यतेइतिवाच्यं एकस्यकर्मणः आरंभकसंयोगप्रतिद्वंद्विविभागजनकत्वस्य अनारंभकसंयोगप्रतिद्वंद्विविभागजनकत्वस्यचाविरोधा
त् अन्यथाविकल्पकल्पकुड्यलंभंगप्रसंगः तस्मात्यदीदंअनारंभकसंयोगप्रतिद्वंद्विविभागंजनयेत तदारंभकसंयोगप्रतिद्वंद्विविभा
गंजनयेत् तदारंभकसंयोगप्रतिद्वंद्विविभागंन्यजनयेत नचकारणविभागेनैवद्रव्यनाशकालेदेशांतरविभागस्यादितिवाच्यं अवयवस्य
सतिद्रव्यदेशांतरविभागासंभवात् द्वितीयस्तावत् यत्रहस्तक्रिययाहस्तनरुविभागः ततः शरीरेपिकुंचितविभक्तप्रत्ययोभवति तत्रचशरी
रनरुविभागेहस्तक्रियानकारणं व्यधिकरणत्वात् शरीरेतुक्रियानास्ति अवयविकर्मणोयावदवयवकर्मनियत्वात् अतस्तत्रकारणाकारण
विभागेनकार्याकार्यविभागोजन्यतइति अतएवगुणांतरविभागाद्गुणांतरमन्यथाशरीरेविभक्तप्रत्ययोनस्यात् अतःसंयोगनाशेनविभागो

नान्यथासिद्धोभवतीतिपरापरत्वव्यवहारनिमित्तपरापरत्वनिरूपयति परत्वंचापरत्वंचेति दैशिकमितिदैशिकपरत्वे बहुतरसूर्यसंयोगोनरितत्व
ज्ञानादुत्पद्यते एवंतदस्मीयस्त्वज्ञानात अपरत्वमुत्पद्यते अत्रावधित्वार्थेनतीत्यापेक्षा यथात्वत्तोपुत्रात्कोजीमपेक्ष्यप्रयागः घरः यात
त्तीपुत्रात्कुरुक्षेत्रमपेक्ष्यप्रयाग अपरइति तयोःदैशिकपरत्वापरत्वयोः असमवायिकारणं तदाश्रयेदैशिकपरत्वापरत्वाश्रये दिवाकरसं
अत्रपरत्वमपरत्वंचकालिकंग्राह्यं यदीयसूर्यपरिस्पंदापेक्षयायस्यसूर्यपरिस्पंदाधिक्यः सज्येष्ठः यस्यन्यूनःसकनिष्ठः कालिकपरत्वा
परत्वेतन्यद्व्येएव अत्रकालिकपरत्वापरत्वयोः एवंकालिकेदैशिकपरत्वापरत्वानां क्रमशोनिबुधैनिरूपयति बुध्वेति अथमानिरू
पयति तच्चान्यद्इतितदभावबतितत्प्रकारकंज्ञानंभ्रमइत्यर्थः तत्प्रपंचः अत्रमाप्रपंचः आयइति विपर्यासइत्यर्थः शरीरादीनिश्चियरूपे
यदाआत्मत्वप्रकारकंज्ञानंगंयेहिमित्याकारकं एवंशरीरादौपीतः शरीरइत्याद्याकारकंयज्ज्ञानंनिश्चयरूपेतद्भ्रमइति किंस्विदितिवित
र्कं निश्चयस्यलक्षणमाह तदभावेति तदभावप्रकारकंतत्प्रकारकंज्ञानंनिश्चियः संशयंलक्षयति संशयइति एकधर्मिकंविरुद्धभावाभा
वप्रकारकंज्ञानंसंशयइत्यर्थः साधारणेति उभयसाधारणोयोधर्मःतज्ज्ञानंसंशयकारणं यथाऊर्ध्वः खुरोवर्त्तिनिस्थाणुत्वंस्थाणुसाधारणंतु
गत्वज्ञानात्स्थाणुर्नवेतिपुरुषःसंदिग्धे एवंअसाधारणधर्मज्ञानंकारणं यथागन्धवत्त्वंनित्यानित्यव्यावृत्तंतत्वंज्ञेयंगृहीत्वाज्ञायतेनित्यो
वेत्यादिसंदिग्धे विप्रतिपत्तिस्तुज्ञेयंनित्यंनवेतिज्ञेयधर्मिकानसंशयकारणंज्ञेयत्वव्याप्यमिज्ञानादीनांचनिश्चयमात्रजनकत्वंसाभाव्यात् किं
तुतत्रज्ञेयकोटिद्वयज्ञानमात्रंजन्यते संशयस्तुमानसएवेति एवंज्ञानेप्रामाण्यंसंशयात् विषयसंशयः एवंव्याप्यसंशयात् व्यापकसंशयइ
त्यादिकंबोध्यं संशयेतुधर्मिज्ञानंधर्मीन्द्रियसन्निकर्षोबाकारणमिति दोषइति अप्रमाअतिदोषः कारणं प्रमांप्रतिगुणः कारणं तत्रपित्तादि
रूपादोषाअननुगताः तेषांकारणत्वमन्वयव्यतिरेकादवसिद्धं गुणस्यप्रमाजनकत्वंतुअनुमानतः सिद्धं यथाप्रमाज्ञानसामान्यकारणमिन्द्रि
यजन्यज्ञानत्वात् अप्रमावत् नचदोषाभावकारणएवंप्रमास्त्वितिवाच्यं दोषतःज्ञानस्खलपित्तरूपदोषसत्त्वेछत्रवप्रमा
नुत्पत्तिप्रसंगात् विनिगमनाविरहादनेनदोषाभावकारणत्वमपेक्ष्यगुणकारणतायाव्यर्थत्वात् नचगुणसत्त्वेपिपित्तेनप्रतिबंधाच्छत्रव
नश्येत्यज्ञानं अतःपित्तादिदोषाभावानांकारणत्वमवश्यंवाच्यं तथाचकिंगुणस्यहेतुत्वकल्पनयेतिवाच्यं यथान्वयव्यतिरेकाभ्यांदोषह
तुत्वकल्पनं तथान्वयव्यतिरेकाभ्यांगुणस्यापिहेतुत्वसिद्धेः एवंभ्रमेप्रतिगुणाभावः कारणमित्यस्यापिसंभवत्वात् तत्रदोषाः केइ
त्यपेक्षायामाह पित्तेति क्वचित्पित्तादिभ्रमेपित्तादिदोषः क्वचिच्चेंद्रादेःस्वल्पपरिमाणग्रहेदूरत्वदोषः क्वचिद्वेगोरगभ्रममंडूकवसां
जनमित्येवंदोषाअननुगताएवभ्रांतिजनकाइत्यर्थः अथकगुणइत्याकांक्षायांप्रत्यक्षादेःक्रमशोगुणान्दर्शयति प्रत्यक्षेत्विति प्र

Doubt
43
1919

त्यक्षेविशेषणबहिरिंद्रियसन्निकर्षोगुणः अनुमितेसाध्यवतिसाध्यव्याप्येविशिष्टज्ञानंगुणः एवमग्रेष्वपि भ्रमोनिरूपयति भ्रमभिन्नमि
ति ननुयत्रशुक्तिरजतयोरिमेरजतेइतिज्ञानंजातंतत्ररजतेशोपिभ्रमःस्यात् तद्ज्ञानस्यभ्रमभिन्नत्वाभावात् अतआह अथवेति तद्
बहिरिंद्रियकतत्प्रकारकज्ञानंभ्रमइत्यर्थः एवंसतिनिर्विकल्पकंभ्रमानस्यात् तस्यतत्प्रकारकत्वाभावात् अतआहनभ्रमेति ननुवृक्षकपिसंयो
गज्ञानंभ्रमः प्रमाचस्यादितिचेन्न प्रतियोगिव्यधिकरणसंयोगाभावतिसंयोगज्ञानस्यभ्रमत्वात् नचवृक्षकपिसंयोगानवछेदकावछेदेनसं
योगज्ञानंभ्रमोनस्यात् तत्रसंयोगाभावस्यप्रतियोगिसमानाधिकरणत्वादितिवाच्यं तत्रसंयोगानवछेदकावछेदेनसंयोगज्ञानस्यभ्रमत्वा
त् लक्ष्यस्याननुगमात् लक्षणाननुगमेपिनक्षतिः भ्रमात्वमिति मीमांसकाहि भ्रमात्वंस्वतोग्राह्यमित्यपिवदंति तन्नयुक्तंभ्रमेज्ञानस्यस्व
प्रकाशत्वात् ज्ञानप्रामाण्यंतेनैवगृह्यते भट्टानांमतेतुज्ञानमतींद्रियंज्ञानजन्यज्ञानताप्रत्यक्षातयाचज्ञानमनुमीयतेमुरारिमिश्राणांमतेतु
अनुव्यवसायेनज्ञानंगृह्यते सर्वेषांमतेपिज्ञानविषयकज्ञानेनतत् ज्ञानप्रामाण्यंगृह्यते विषयनिरूप्यंहिज्ञानमतोज्ञानविच्छिन्नंयोविष
यइति तन्मतंदूषयति नस्वतोग्राह्यमिति संशयइति यद्ज्ञानप्रामाण्यंस्वतोग्राह्यंस्यात् अनभ्यासदशापन्नज्ञानेप्रामाण्यसंशयोनस्यात्
तत्रहियदाज्ञानेज्ञातंतदातन्मतेप्रामाण्यंज्ञातमेवेतिकथंसंशयः यदितुज्ञानेनज्ञातंतर्हिधर्मिज्ञानाभावात्कथंसंशयः तस्माज्ज्ञानेप्रामाण्य
मनुमेयं तथाहि इदंज्ञानंप्रमा संवादिप्रवृत्तिजनकत्वात् इदंपृथिवीत्वप्रकारकंज्ञानंप्रमा गंधवतीपृथिवीत्वप्रकारकज्ञानत्वात् एवंइदंज्ल
त्वप्रकारकंज्ञानंस्नेहवतिजलत्वप्रकारकत्वात् नचहेतुज्ञानेकथंज्ञानमितिवाच्यं पृथिवत्वप्रकारकत्वस्यस्वतोग्राह्यत्वात् तत्रगंधग्रहणंगंध
बहिरिंद्रियकत्वस्यापिसत्त्वात् तत्प्रकारकत्वाच्छिन्नंहिज्ञेयकंसंपरंनगृह्यते संशयानुरोधात् ननुसर्वेषांज्ञानानांयथार्थत्वात् प्रमात्व
क्षणेनतद्बहिरिंद्रियकत्वंविशेषणंव्यर्थं नचरंगेरजतार्थिनः प्रवृत्तिर्भ्रमजन्यानस्यात् तवमतेभ्रमस्याभावादितिवाच्यं तन्नदोषाधीनस्यपुरोव
र्त्तिनिसर्वत्रोपस्थितेरजतभेदाग्रहस्यहेतुत्वात् सत्यरजतस्थलेतुविशिष्टज्ञानस्यसत्त्वात् तदेवकारणमस्तुवातत्रापिभेदाग्रहएवकारणमि
ति नचान्यथाख्यातिः संभवति रजतप्रत्यक्षकारणस्यरजतसन्निकर्षस्याभावात्रंगेरजतबुध्नेरनुपपत्तेरितिचेन्न सत्यरजतस्थलप्रवृत्तिप्रति
विशिष्टज्ञानस्यहेतुतायाः कुप्रत्यादन्यत्रापितत्कल्पनात् नचसंवादिप्रवृत्तौतत्कारणेविसंवादिप्रवृत्तौतुभेदाग्रहः कारणमितिवाच्यं रजाधर्वे
नतस्यप्रवृत्तिमात्रहेतुत्वकल्पनात् इत्थंरंगेरजत्वविशिष्टबुध्यनुरोधेनज्ञानलक्षणप्रत्यासत्तिकल्पनेपिनक्षतिः फलमुखगोरवस्यो
दोषत्वात् किंचयत्ररंगेरजतयोरिमेरजतरंगेवाइतिज्ञानंनतत्रकारणबाधोपि अपिच यत्ररंगेरजतयोरिमेरजतरंगेइतिज्ञानंतत्रोभयत्रय
थपत्यप्रवृत्तिनिवृत्तिस्यातां रंगेरंगभेदाग्रहेचरजतेरजतभेदाग्रहेच अन्यथाख्यातिभयात्त्वन्मतेरंगेरंगभेदाग्रहस्यरजतेरजतभेदाग्रहस्य

सत्वात् अतोदोषदेवरंगेरजतभेदाग्रहस्यरजतेरंगभेदाग्रहस्यसत्वात् किंचअनुमितिंप्रतिलिंगज्ञानभेदाग्रहस्यहेतुत्वेजलह्रदेवह्निव्याप्यधूमवत्
भेदाग्रहादनुमितिर्निराबाधा यदिन्वविशिष्टंज्ञानंकारणंतदाअयोगोलकवह्निव्याप्यधूमज्ञानमनुमित्यनुरोधादापतितं इत्थंचअन्यथाख्यातिप्रत्य
क्षमेवप्रमाणं रंगरजततयाज्ञानामीत्यनुभवादितिसंक्षेपः पूर्वंव्याप्तिरुक्तानुद्देशक्रमेणव्याप्तिग्रहोपायस्तूदर्शितः इत्यतस्तंदर्शयति व्यभिचारेति व्यभिचार
ग्रहः सहचारग्रहस्यव्याप्तिग्रहकारणमित्यर्थः व्यभिचारग्रहस्यव्याप्तिग्रहप्रतिबंधकत्वात् तदभावः कारणमित्यर्थः एवमन्वयव्यतिरेकाभ्यांसहचा
रज्ञानस्यापिहेतुता भूयोदर्शनेनेकारणं व्यभिचारास्फूर्तौसत्यांदृष्टेनापिक्वचिद्व्याप्तिग्रहात् क्वचिद्व्यभिचारशंकानिवर्त्तनद्वाराभूयोदर्शनमुपयु
ज्यते यत्रतुभूयादर्शनादपिशंकानिवर्त्ततेतत्रविपक्षेबाधकस्तर्कोपेक्षितः तथाहि वह्निविरहिण्यपिधूमस्यात् इतियत्राशंकाभवतितदासाव
ह्निधूमयोःकार्यकारणभावप्रतिसंधानान्निवर्त्तते यद्ययंवह्निमानतस्यातदाधूमवानस्यात् कारणविनाकार्यानुपपत्तेः यदिचकारणंविनापिभ
विष्यत्येहतुकत्वंवाभविष्यतीतिनव्याप्तिशंकाभवतितदासाध्याधातादपसारणीयातदाधूमार्थंवह्निस्मरणंभोजनस्यचनियमतउपादानंतंविनस्यादि
ति यत्रस्वतएवशंकानावतरतितत्रनतर्कोपेक्षते तदिदमुक्तंतर्कः क्वचिच्छंकानिवर्त्तकइति तदानीमुपाधिंनिरूपयति साध्यस्येति साध्यत्वा उपाधि
भिमतव्यापकत्वंसतिसाधनत्वाभिमताव्याकइत्यर्थः ननुसर्वंयोमित्रातनयत्वात् इत्यादौज्ञाकपाकजन्यत्वंनोपाधिः स्यात् तस्यसाध्यव्याप्यकत्वा
भावात् श्यामत्वस्यघटादावपिसत्वात् एवंवायुःप्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्रोद्भूतरूपवत्वंनोपाधिः स्यात् प्रत्यक्षत्वस्यात्मादावपिस
त्वात् तत्ररूपाभावात् एवंध्वंसीविनाशीजन्यत्वात् इत्यत्रभावत्वंनोपाधिस्यात् विनाशित्वस्यप्रागभावेपिसत्वात् तत्रभावत्वाभावादितिचेन्न
यद्धूमावच्छिन्नसाध्यव्यापकत्वंतधूमावच्छिन्नसाधनाव्यापकत्वमित्येतान्यर्थात् मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकंज्ञाकपाकजत्वं बहिर्द्रव्यत्वा
वच्छिन्नप्रत्यक्षत्वस्यव्यापकंउद्भूतरूपवत्वं बहिर्द्रव्यत्वावच्छिन्नसाधनाव्यापकंच एवंध्वंसीविनाशीजन्यत्वादित्यत्रजन्यत्वावच्छिन्नसाध्यव्यापकंभा
वत्वं सर्वंतोनुमाद्दशधर्मोनास्ति यदवच्छिन्नस्यसाध्यस्यव्यापकंतदवच्छिन्नसाधनस्यचाव्यापकं किंचित्स्यात् व्यभिचारिणिउपाध्युपाधिकरणं
यत्साध्याधिकरणंयत्रोपाधिश्चत्यंसाध्यव्यभिचारनिरूपकं अधिकरणं अंतर्भूतस्तदन्यतरत्वावच्छिन्नस्यसाध्यस्यव्यापकत्वंसाधनस्याव्याप
कत्वमुपाधेः संभवतिअतएवलक्ष्यमपिउपाधिस्वरूपंवृत्तदनुसारेणदर्शयति सर्वेइति स्वसाध्येति स्वउपाधिः स्वंचसाध्यंचस्वसाध्येतयो
र्व्यभिचारितेत्यर्थः उपाधेर्दूषकतांबीजमाह व्यभिचरतीति उपाधिव्यभिचारेणसाध्यव्यभिचारानुमाममुपाधेः प्रयोजनमित्यर्थः तथा
हि यत्रशुभ्रेसाध्यव्यापकः तत्रशुभ्रेनोपाधिव्यभिचारेणसाध्यव्यभिचारानुमानं तथाधूमवान्वह्नेः इत्यादौवह्निधूमव्यभिचारीआर्द्रेधन
व्यभिचारित्वादितिव्यापकव्यभिचारिणोव्याप्यव्यभिचारावश्यकत्वात् यत्रकिंचिद्धूमावच्छिन्नसाध्यव्यापकः उपाधिस्तत्रतद्धूमवतिउपाधिव्य

45
1919

भिचारसाध्यव्यभिचारानुमानं यथासश्यामोमित्रातनयत्वादित्यादौहिमित्रातनयत्वंश्यामत्वव्यभिचारिमित्रातनयेज्ञाकपाकजत्वव्यभिचारि
त्वादिति बाधानुन्नीतपक्षेतरत्वेनुसाध्यव्यापकतायाग्राहकप्रमाणाभावात् स्वव्याघातकत्वाच्चनोपाधिः बाधोन्नीतपक्षेतरत्वेनोपाधिर्भवत्ये
व यथावह्निरनुष्णः कृतकत्वात्इत्यादौप्रत्यक्षेणवह्नेरुष्णत्वग्रहेवह्नीतरत्वमुपाधिः यस्यतूपाधेःसाध्यव्यापकत्वादिकंसोदिश्यतेससं
दिग्धोपाधिः पक्षेतरत्वेनुसंदिग्धोपाधिर्नोद्भावनीयः कथकसंप्रदायानुरोधादितिकेचित्तु सत्प्रतिपक्षोत्थापनमुपाधेः फलं तथाहि अयो
गोलकंधूमवत्वह्नेः इत्यादावयोगोलकंधूमाभाववत् आर्द्रेधनाभावादितिसत्प्रतिपक्षसंभवात् इत्थंचसाधनव्यापकोपिक्वचिदुपाधिर्यथा।
करकाःपृथिवीकठिनसंयोगवत्वादित्यादौअनुष्णाशीतस्पर्शवत्वं नचात्रस्वरूपासिद्धिरेवदूषणमितिवाच्यं सर्वत्रोपाधेर्दूषणांतरसाकर्यात् अ
त्रसाध्यव्यापकः पक्षावृत्तिरुपाधिरित्याहुः ज्ञाब्दोपमानयोरिति वैशेषिकाणांमतेप्रत्यक्षमनुमानंचप्रमाणं ज्ञाब्दोपमानयोरनुमानविधे
येप्रामाण्यं तथाहि देवदत्तेनगामानयेतिसोमेनयज्ञेतेत्यादिपदानि वैदिकपदानिवातात्पर्यविषयस्मारितार्थसंसर्गज्ञानपूर्वकानि आकांक्षादि
मत्पदकदेवकत्वात् घटमानयेतिपदकदेवत्वात् यद्वा येतेपदार्थाः मिथःसंसर्गवंतः योग्यतादिमत्पदोपस्थापितत्वात् तादृशपदार्थवत् दृष्ट
तेपिदृष्टांतांतरेणसाध्यंसिध्यतीति एवंगवयपदंगवत्वप्रवृत्तिनिमित्तकं असतिवृत्त्यंतरेरूढेस्तत्रप्रयुज्यमानत्वात् अस
तिवृत्त्यंतरेरूढेस्तत्रप्रयुज्यमानत्वात् असतिवृत्त्यंतरेयत्रयत्ररूढेप्रयुज्येतेतत्तत्प्रवृत्तिनिमित्तकं यथागोपदंगोत्वप्रवृत्तिनिमित्तकं यद्वागव
यपदंसप्रवृत्तिनिमित्तकं साधुपदत्वादिनुमानेनपक्षधर्मतांबलाद्गवयत्वप्रवृत्तिनिमित्तकत्वंभासते तन्मतंदूषयति तन्नसम्यग्विनाव्याप्ति
बोधंशब्दादिबोधतः व्याप्तिज्ञानंविनापिज्ञाब्दबोधस्यानुभाविकत्वात् नहिसर्वत्रज्ञाब्दस्थलेव्याप्तिज्ञानेमानमस्तिकिंचित्परिसर्वत्र
ज्ञाब्दस्थलेव्याप्तिज्ञानंकल्प्यतेतदाअनुमितिस्थलेपदज्ञानंकल्पयित्वाज्ञाब्दबोधएवकिंनस्वीक्रियतेइति द्वैविध्येनुभवेद्व्यतिरेकव्य
तिरेकः अन्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिअन्वयव्यतिरेकिभेदात् तत्रासद्विपक्षः केवलान्वयि यथाज्ञे
यमभिधेयत्वादित्यादौसर्वंस्यैवज्ञेयत्वाद्विपक्षासत्वं असत्सन्पक्षः केवलव्यतिरेकि यथाष्टथिवीतरेभ्योभिद्यतेगंधवत्वादित्यादौ तत्रज
त्वादित्यादेशभेदस्यपूर्वंसिद्धत्वान्निश्चितसाध्यवतः सपक्षस्याभावइति सत्सपक्षविपक्षोअन्वयव्यतिरेकी यथावह्निमान्धूमा
दित्यादौ तत्रसपक्षस्यमहानसादेर्विपक्षस्यजलह्रदेश्चसत्वादिति तत्रव्यतिरेकिणिव्यतिरेकव्याप्तिज्ञानेकारणं तदर्थंव्यतिरेकव्याप्तिनि
र्वक्ति व्यतिरेकाथोच्यते साध्याभावव्यापकत्वंहेत्वभावस्ययद्यप्येवं साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः अत्रेदंबोध्यं ये
नसंबंधेनयत्रयेनरूपेणव्यापकत्वंगृह्यते तत्संबंधावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावज्ञानंतत्रयेनसंबंधेनयद्यवच्छिन्नप्रतियो

चतुर्दशीत्यपिक्वचित्पाठः दृश्यते ~

व्यतागृह्यतेतत्संबंधावच्छिन्नप्रतियोगिताकतभर्मावच्छिन्नाभावस्यसिद्धिः इत्थंचयत्रेतरत्वव्यापकत्वंगंधाभावेगृह्यते तत्रगंधाभावाभावे
नेतरत्वान्योन्याभावः सिध्यति यत्रनुतादात्म्यसंबंधेनेतरव्यापकताग्रहस्ते तत्रतादात्म्यसंबंधेनेतरस्याभावः सिध्यति सएवचान्योन्याभावः
एवंयत्रसंयोगसंबंधेनधूमंप्रतिसंयोगसंबंधेनवह्नेर्व्यापकताग्रहस्ते तत्संयोगसंबंधावच्छिन्नप्रतियोगिताकवह्न्याभावेनजलहृदसंयोग
संबंधावच्छिन्नप्रतियोगिताकधूमाभावः सिध्यति अत्रव्यतिरेकव्याप्तिग्रहेव्यतिरेकसहचारज्ञानंकारणं केचित्तु व्यतिरेकसहचारेणा
न्वयव्याप्तिरेवगृह्यते नतुव्यतिरेकव्याप्तिज्ञानमपिकारणं यत्रव्यतिरेकसहचारादन्वयव्याप्तिरेवगृह्यतेतत्र व्यतिरेकोत्यज्यते साध्यधू
मिश्रिक्तधयादावेवज्ञायतेपश्चात्पृथिवीत्वावच्छेदेनसाध्यतइति अर्थापत्तेस्तुनेहप्रमाणांतरमिष्यते व्यतिरेकव्याप्तिबुधाश्चरितार्थो
हिसायतः अर्थापत्तिः प्रमाणांतरंकेचनमन्यंते तथाहि यज्ञदत्तस्यज्ञातवर्षजीवित्वंज्योतिःज्ञास्यादवगते तस्यगृहसत्वेप्रत्यक्षे
णगृहीते तत्रज्ञातवर्षजीवित्वान्यथानुपपत्त्याबहिः सत्वंकल्प्यते तदप्यनुमानेनगतार्थत्वान्नेष्यते तथाहि ज्ञातवर्षजीवित्वस्यबहिः सत्व
गृहः सत्वान्यतरव्याप्यत्वंगृहीतंतत्रान्यतरसिद्धोजायमानायांगृहसत्वबाधाद्बहिः सत्वमनुमितोभासते एवंपीनोदेवदत्तोदिवानभुंक्ते
इत्यादौपीनत्वस्यभोजनव्याप्यत्वावगमाद्रात्रौजनेसिध्यदिवाभोजनबाधेरात्रिभोजनंसिध्यतीति अभावप्रत्यक्षस्यानुभविकत्वादनुपलंभो
पिनप्रमाणांतरं किंचानुपलंभस्याज्ञानस्यहेतुत्वेज्ञानाकरणकत्वात्प्रत्यक्षत्वंज्ञानस्यहेतुत्वेनुनत्वाप्यनुपलंभोतरापेक्षत्वेनवस्था चेत्या
पिनप्रमाणांतरं तस्याःज्ञप्तेरकत्वेनलिप्यादिसमशीलत्वाच्छब्देवांतर्भावात् यत्तुव्याप्तियहस्तत्रानुमितिरेवेति सुखंनिरू
पयति सुखंतुजगतामेवकाम्यंधर्मणजन्यते काम्यंअभिलाषविषयः धर्मत्वेनसुखत्वेनकार्यकारणभावादित्यर्थः दुःखंनिरूपयति।
अधर्मजन्यंदुःखंस्यात्प्रतिकूलंसचेतसां अधर्मत्वेनदुःखत्वेनकार्यकारणभावइतिभावः सर्वेषांस्वाभाविकद्वेषविषयइत्यर्थः इच्छांनि
रूपयति निर्दुःखत्वेसुखेचेच्छातत्तज्जादेवजायते इच्छतुनदुपायेस्यादिष्टोपायत्वधीर्यदि तथाहि इच्छाफलविषयिणीउपायविषयि
णीवाफलंसुखंदुःखाभावश्च तत्फलेच्छाप्रतिफलज्ञानंकारणं अतएवपुरुषार्थःसंभवति यत्तज्ज्ञानंसत्ववृत्तितयेष्यते पुरुषार्थ
इतितल्लक्षणात्तु इतरेच्छानधीनेच्छाविषयत्वंफलितोर्थः उपायेच्छांप्रतिलिष्टसाधनताज्ञानंकारणं चिकीर्षाकृतिसाध्यत्वप्रकारेच्छा
तुयाभवेत् तयेनुःकृतिसाध्येष्टसाधनत्वंमतिर्भवेत् कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषयिणीचिकीर्षा पाकं कृत्वासाधयामीति
प्रत्ययात् चिकीर्षांप्रतिकृतिसाध्यताज्ञानंइष्टसाधनताज्ञानंचकारणं अतएवकृष्यादौकृतिसाध्यताज्ञानाभावान्नचिकीर्षा बलव
द्दिष्टहेतुत्वमतिः स्यात्प्रतिबंधिका बलद्दिष्टसाधनताज्ञानंतत्प्रतिबंधकं बलद्देषप्रतिबंधकइत्यन्ये तदहेतुत्वंबुधैस्तुहेतुत्वंकस्यचि

47
1919

न्मते बलवदनिष्टाजनकत्वज्ञानंकारणमित्यर्थः द्वेषंनिरूपयति द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्यकारणं अत्रबलवद्दिष्टसाधनताज्ञानंकारणं तेन
नानतरोयदुःखजनकपाकादौनद्वेषः यत्नंनिरूपयति प्रवृत्तिश्चनिवृत्तिश्चतयाज्ञानंकारणं एवंयत्नश्चेविध्यंतत्रिकेःपरिकीर्तितं प्रवृत्तिनिवृ
त्तिजीवनयोनियत्नभेदायत्नस्त्रिविधः चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा उपादानस्यचाध्यक्षंप्रवृत्तोजनकंमतं उपादानस्यसमवायि
कारणस्य मधुविषसंपृक्तान्नभोजनादेर्बलवदनिष्टानुबंधित्वेनचिकीर्षाभावान्नप्रवृत्तिरितिभावः कृतिसाध्यताज्ञानादिवद्बलवदनिष्टानुबं
धित्वज्ञानमपिस्वनैरान्वयव्यतिरेकाभ्यांप्रवृत्तौकारणमित्यपिवदंति अन्यतरवः कार्यताज्ञानमेवप्रवर्तकं ज्ञानस्यप्रवृत्तौजननेन्याय्यात्तुचिकीर्षाति
रिक्तंनापेक्षितमस्ति साकृतिसाध्यताज्ञानमाश्रयेच्छायाःस्वप्रकारकधीसाध्यत्वनियमात् चिकीर्षाकृतिसाध्यत्वप्रकारिकेच्छात्वकृतिसा
ध्यत्वंप्रकारः तत्प्रकारकंज्ञानंचिकीर्षायांतद्रागप्रवृत्तौचहेतुः नत्विष्टसाधनताज्ञानंतत्रहेतुः कृत्यसाध्येपिप्रवृत्त्यापत्तेः कृत्यसाध्यताज्ञा
नेप्रतिबंधकमितिचेन्न तदभावापेक्षयाकृतिसाध्यताज्ञानस्यलघुत्वात् नचद्वयोरपिहेतुत्वेगौरवात् ननुलब्धमेतेपिमधुविषसंपृक्तान्नभक्षणे
चेत्यवदनेनचप्रवृत्त्यापत्तेः कार्यताज्ञानादितिचेन्न स्वविशेषणवत्तत्प्रतिसंधानजन्यकार्यताज्ञानस्यप्रवर्तकत्वात् काम्येहियागफलादेका
मनास्वविशेषणं ततश्चबलवदनिष्टाननुबंधिकाम्यसाधनताज्ञानेनकार्यताज्ञानंततःप्रवृत्तिः तदश्वभोजनेनप्रवर्तते तदानींकामनायाःपु
रुषविशेषणत्वाभावात् निःस्पृहोत्रादिकंपुरुषविशेषणं तेनस्पृहादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्रप्रवृत्तिः नचतदपेक्षयालाघवेनब
लवदनिष्टाननुबंधीष्टसाधनताज्ञानमेवहेतुरस्तु बलवदनिष्टाननुबंधित्वंचेष्टसाधनत्वंतिनोतरीयकदुःखजनकत्वंबलवद्द्वेषविषयदुःखजनक
त्वेतिवाच्यं इष्टसाधनत्वंकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात् साध्यत्वसाधनत्वयोर्विरोधात् अतोभस्यसाध्यत्वंसिध्यत्यसाधनत्वं नचे
कमेकेनकृतंसभसमभिधंचेतिज्ञायते तस्मात्कालभेदादुभयंज्ञायतेति मैवं लाघवेनबलवदनिष्टाननुबंधीष्टसाधनत्वंसतिकृतिसाध्यताज्ञान
स्यहेतुत्वात् नचसाध्यत्वसाधनत्वयोर्विरोधः यदाकदाचित्साध्यत्वसाधनत्वयोरविरोधात् एकदासाध्यत्वेस्यसाधनत्वस्य चाज्ञानात् नवी
नाम्न ममेदंकृतिसाध्यमितिज्ञानेनप्रवर्तकं अनागतस्यज्ञातुमशक्यत्वात् किंतुयादृशस्यपुंसःकृतिसाध्यंयदृष्टंतादृशत्वंप्रतिसंधायप्रव
र्तते भोजनकामस्यतत्साधनताज्ञानवत्तस्तंदुलायुपकरणवृतः पाकःकृतिसाध्यस्तादृशश्चहमितिप्रतिसंधायपाकेप्रवर्त्ततइत्याहुः तन्न
स्वकल्पितलिप्यादिप्रवृत्तौयोवनेकामोद्वाहादिनासंभोगादेश्चनदभावात् इदंतुबोध्यं इदानींमिष्टसाधनत्वज्ञानंकृतिसाध्यताज्ञानंचप्र
वर्तकं तेनभाविनोवराज्यबालस्यनप्रवृत्तिः तदानींकृतिसाध्यत्वज्ञानाभावात् एवंहसोभोजनेनप्रवर्त्ततेतदानीमिष्टसाधनत्वज्ञानाभा
वात् प्रवर्त्ततेचरोषदूषितचित्तोविषादिभक्षणे तदानींबलवदनिष्टाननुबंधित्वज्ञानात् नचआस्तिकस्यागम्यागमनेस्वधादिप्रवृत्तोचक

श्येनवदनिष्टाननुबंधित्वबुद्धिर्नरकसाधनत्वज्ञानादितिवाच्यं उत्कटरागादीनांनरकसाधनताधीनिरोधात् वृष्ट्यादेरनुकूलसाध्यत्वज्ञानाभा
वान्चिकीर्षाप्रवृत्तिः किंत्विष्टसाधनताज्ञानादिछामात्रं कृतिश्चप्रवृत्तिस्वरूपाबोध्या तेनजीवयेनियत्नसाध्यप्राणसंचारादेनप्रवृत्तिः
इत्थंचनप्रवर्त्तकत्वानुरोधादिष्टेरपितावानर्थः इत्थंचयज्ञेतेत्यादौयत्रफलंनश्रूयतेतत्रापिस्वर्गःफलंकल्प्यते नेतरथादेरुक्तानुपपत्तेः क
थंप्रवृत्तिः नचार्थवादैकवाक्यतालोकावाप्तिः प्रत्यवायाभावोवाफलमितिवाच्यं तथासतिकाम्यत्वेनित्यत्वहान्यापत्तेः कामनाभावेचाकरण
वत्सक्तिः इत्थंचयत्रफलश्रुतिस्तत्रार्थवादइतिचेन्न ग्रहणश्राद्धादीनित्यत्वेनमित्तिकत्वयोरिवनित्यत्वकाम्यत्वयोरप्यविरोधात् नचका
मनाभावेअकरणापत्तिः त्रिकालस्तवपागदाविवकामनासद्भावेस्यवकल्पनात् नन्वेवंहिबोधितकर्त्तव्यज्ञानात्प्रवृत्तिःसंभवतीतिचेन्न
स्वेष्टसाधनत्वमज्ञात्वातादृशकार्यज्ञानसहस्रेणापिप्रवृत्तेरसंभवात् यद्यपिपंडादेर्वैफल्यमिति तदपिन कामनाभावेकरणापत्तेः स्तोत्यात्
कामनाकल्पनेत्यर्थवादिकंफलमेव शास्त्रिसत्रन्यायात्कल्पतां अन्यथाप्रवृत्त्यनुपपत्तेः एवंसंध्यामुपासतेयेनुसंततेत्रसिनव्रताः विधूतपा
पास्तेयांतिब्रह्मलोकमनामयं एवंहयादहरहः श्राद्धंपितृभ्यश्चस्वधेतिमावहन्तित्यादिकफलमुक्तं नचपितृप्रीतिः कथंफलंव्यधिकरणत्वा
दितिवाच्यं गयाश्राद्धादिवादेरप्यत्वसंबंधेनफलजनकत्वंस्यवक्वचित्कल्पनात् अतएवोक्तंशास्त्रदीपिकायां फलेअनुष्ठातरीत्यत्सर्गइति
पितृणांमुक्तत्वनुस्वस्यस्वर्गादिफले यावन्नित्यनैमित्तिकानुष्ठानस्यसामान्यतः स्वर्गफलकत्वात् पंडादावर्थेप्रवृत्तिर्नसंभवति महिनत्स
र्वदुःखाभावत्वस्वतः पुरुषार्थः नवातत्साधने प्रत्यवायानुत्पत्तेःकथंप्रवृत्तिरितिचेन इत्थंचयथाहि नित्यात्तेप्रत्यवायाभावस्तिष्ठति त
तदभावेतदभावः एवंप्रत्यवायाभावासंबंधेदुःखप्रागभावसत्वं तदभावेतदभावइति योगक्षेमसाधारणकारणतायादुःखप्रागभावप्रत्यपिसत्व
त्वात् एवमेवप्रायश्चित्तस्यापिदुःखप्रागभावहेतुत्वमिति ननुकलंजेनवमक्षयेदित्यत्रविध्यर्थेकथंनार्थान्वयः इष्टसाधनत्वाद्यभावस्य
बोधयितुमशक्यत्वादितिचेन्न तत्रबाधात्कृतिसाध्यत्वमिष्टसाधनत्वंचनविध्यर्थः किंतुबलवदनिष्टाननुबंधित्वमात्रंतदभावश्चनज्ञा
बोध्यते अथवाबलवदनिष्टाननुबंधीष्टसाधनत्वसतिकृतिसाध्यत्वेविध्यर्थः तदभावश्चनज्ञाबोध्यमानोविघ्नाभावोविघ्नोभाव्यवति वि
घ्नोपणाभावएवविश्राम्यति ननुश्येनेनयागःकर्त्तव्यइत्यत्रकथंबलवदनिष्ट ननुबंधित्वंविध्यर्थः श्येनस्यमरणानुकूलव्यापारस्यहिंसा
त्वेननरकसाधनत्वात् नचवेधत्वान्निषेधइतिवाच्यं अभिचारप्रायश्चित्तोपदेशात् नचमरणानुकूलव्यापारमात्रंहिंसायदितदारव
इकारस्यकूपकर्तृश्वहंतृत्वापत्तिः गोलग्नान्नभक्षणजन्यमरणेनआत्महंतृत्वापत्तिश्चेतिवाच्यं मरणोद्देशकत्वविशेषणात् अत
एवसप्तमीतेलाभ्यंगस्यनहिंसात्वं अन्योद्देश्यकत्वेननिसिनारायहतब्राह्मणस्यतुवाचनिकंप्रायश्चित्तमितिचेन्न श्येनवायारणादृष्टा

रम
२३

49
1919

दृष्टकत्वविशेषणात् अतएवकारीरीमरणार्थकतन्निर्वपणादेरपिनहिंसात्वं नचसास्वात्मरणजनकस्येवहिंसात्वं श्येनस्तुनतथाकिंतुतज्ज
न्यापूर्वमितिवाच्यं स्वदुपातेनब्राह्मणेव्रणपाकपरंपरयामृतेहिंसात्वानापत्तेः अभिचारप्रायश्चित्तोपदेशात्तेनमित्तिककर्मांतरं वर्णितंहिव
धार्थेयत्रश्रूयतत्रवेदेतत्यावनायकर्त्तव्यश्रुतिः सारस्वतोहिजेत्यादिकमप्येवन्यायात्मानं केचित्तु श्येनस्यहिंसाफलंनतुमरणं
तेनश्येनजन्यवृद्धादिरूपहिंसाअभिचारपदार्थः तस्यचपापजनकत्वं श्येनस्यवेधत्वात्पापजनकत्वेप्यग्नियेपापंप्रतिसंधायसं
तोनप्रवर्त्तंतइति आचार्यास्तु आत्माभिप्रायोविध्यर्थः पाकंकुर्यादित्याद्यावाक्यादिरूपेच्छावाचित्वबलिऊह्यत्वेच्छावाचित्वंलाघवात्
एवंचस्वर्गकामोयजेतेत्यादेर्यागेःस्वर्गकामकृतिसाध्यतयाआप्तेरुद्देश्यर्थः अतश्चाप्ताभिप्रायविषयत्वेनेष्टसाधनत्वादिकमनुमायप्रवर्त्त
ते कलंजभक्षणेतदभावान्नप्रवर्त्तते यस्तुवेदपौरुषेयत्वेनाभ्युपैतिनेप्रतिविधिरेवतावद्भर्भश्रुतिकुमायाः पुंयोगएवमाने नचकर्तुःस्मरणं
बाधकं कपिलकणादादिकमारभ्याद्यपर्यंतकर्त्तृस्मरणस्येवप्रतीयमानत्वात् अन्यथास्मृतीनामप्यकर्तृकत्वापत्तेः तत्रेवकर्तृस्मरणभ
स्मिनिचेन्नकानितदावेदेपिछंदांसिउक्तानि तनेत्यादिकर्तृस्मरणमस्त्येवएवं प्रतिमन्वंतरेचषाश्रुतिरन्याविधीयतइतिदृष्ट्यं स्वयंभूरेवभ
गवान्वेदोगीतस्त्वयापुरा शिवोब्रह्माद्याऋषयेतासमर्त्तारोस्यनुकारकाइतिवेदस्मृतिमात्रं नचपौरुषेयत्वेभ्रमादिसंभवादप्रामाण्यस्या
दितिवाच्यं नित्यसर्वज्ञत्वेननिर्दोषत्वात् अतएवपुरुषांतस्यभ्रमादिसंभवान्नकपिलादिकर्तृत्वेवेदस्य किंचवर्णानामेवानित्यत्वंस्यवक्ष्यमा
णत्वात्कृतकत्वमेववेदस्यानित्यत्वमिति उपादानस्यसमवायिकारणस्यअव्यवहितप्रत्यासन्नत्वंनोकारणमिति निवृत्तिस्तुभवेद्दृष्टादृष्टसाधनता
धियः द्विसाधनताज्ञानस्यनिवृत्तिंप्रतिजनकत्वमन्वयव्यतिरेकाभ्यामवधारितमितिभावः यत्तुजीवनयोनिरसर्वेंद्रियोभवेत् जीव
नयोनियत्नयावज्जीवनमनुवर्त्तते सचानींद्रियः तत्रप्रमाणमाह शरीरप्रमाणसंचारकारणंतत्प्रकीर्तितं प्राणसंचारोहि अधिकश्वासादि
प्रयत्नसाध्यः इत्थंचप्राणसंचारस्ययत्नसाध्यत्वानुमानात्तत्पक्षेयत्नबाधादतींद्रियत्वसिद्धिः सत्वजीवनयोनियत्नः गुरुत्वंनिरूपयति
अतींद्रियंगुरुत्वंस्यात्पृथिव्यादिद्रव्यपतत अनित्यंतदनित्यस्यानित्येनित्यमुदाहृतं तदेवासमवायिस्यात्पतनारंभेनुकर्मणि अनित्यद्र
व्यकादौ तद्गुरुत्वं नित्येपरमाणौनित्यंगुरुत्वमित्यनुवर्त्तते तत्रगुरुत्वं असमवायिकारणं द्रवत्वंनिरूपयति सांसिद्धिकंद्रवत्वंस्यान्नैमि
त्तिकमथापरं सांसिद्धिकंनुसलिलद्वितीयक्षितितेजसोः परमाणौजलेनित्यमन्यत्रानित्यमुच्यते द्रवत्वंद्विविधंसांसिद्धिकंनैमित्तिकंचत्य
र्थः द्वितीयेनैमित्तिकंपरमाणाविनिजलपरमाणौनित्यंद्रवत्वं अन्यत्रपृथिवीपरमाणौजलद्व्यणुकादौवाअनित्यंकुत्रचित्तेजसि कुत्रचत्पृथि
व्यांनैमित्तिकंद्रवत्वं तत्रकोवानैमित्तिकार्थस्तदुच्यते नैमित्तिकंवह्नियोगात्तपनीयघृतादिषु अग्निसंयोगाज्जन्यनैमित्तिकंद्रवत्वं त

140766

नन्नसुवर्णादिरूपतेजसि घृतजतुप्रभृतिषुवर्त्ततइत्यर्थः इवलस्नेहेनहेतुनिमित्तसंग्रहेहतुतत् हेतुरसमवायिकारणमित्यर्थः संग्रहेसङ्घा
दिसंयोगविशेषतत् इवतस्नेहसहितबोध्यं तेनसुवर्णादीनांनसंग्रहः स्नेहंनिरूपयति स्नेहोजलसमिस्नोष्णावृत्तिस्नोवयविन्यसौ जलज
लगतइत्यर्थः ननुपृथिव्यामपितेलेस्नेहउपलभ्यते नचासौजलीयः यथासत्तिदहनप्रतिकूल्यप्रसंगादतआह तेलान्तरेतत्सकर्षादहन
स्यानुकूलता तत्प्रकर्षात् स्नेहप्रकर्षात् तत्रउपलभ्यमानस्नेहोजलीयएव तस्मप्रकृष्टत्वादग्नेरनुकूल्ये अपकृष्टस्नेहनंजलंवह्निना
शायतीतिभावः संस्कारंनिरूपयतिसंस्कारभेदादिति संस्कारभेदोवेगास्थितिस्थापकभावने मूर्तमात्रेभवेद्वेगः कर्मजोवेगजः क
चित् वेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविधइत्यर्थः कर्मनइतिवेगोहि विधइत्यर्थः शरीरोदीहनोदन जनितकर्मणावेगोजन्य
ते तेनचपूर्वकर्मनाशः ततःउत्तरकर्म एवमग्रेपि विनावेगंकर्मणः कर्मप्रतिबंधकत्वात्पूर्वकर्मनाशेउत्तरकर्मनसस्यात् यत्रवेगव
ताकपालेनजनितघटेवेगोजन्यते सवेगजोवेगः स्थितिस्थापकसंस्कारः क्षितौकचिच्चतुर्धापि अतींद्रियःसविज्ञेयः कचित्स्पर्शेपि
कारणं आकृष्टशरवादीनांपुनर्गमनेस्थितिस्थापकसाध्ये यतुस्थित्यादिचतुर्धापिस्थितिस्थापकमन्यंते तदप्रमाणमितिकेचिदिति के
चिच्छब्दोभावनाख्यस्तसंस्कारो जीववृत्तिरतींद्रियः उपेक्षानात्मकस्मृतिनिश्चयःकारणंभवेत् तस्यसंस्कारस्य उपेक्षात्मकज्ञा
नात्संस्कारानुसंधानेरूपेक्षानात्मकइति तत्संज्ञायात्स्मृत्यनुसंधानेश्चनिश्चयइति तेनउपेक्षान्यनिश्चयत्वेनसंस्कारप्रतिहेतुतेतिभावः न
नुस्मरणंप्रत्यपेक्षान्यनिश्चयत्वेनहेतुतं तेनउपेक्षास्थलेनस्मरणं इत्थंचसंस्कारंप्रतिज्ञानत्वेनैवहेतुतास्त्विति चेन्न विनिगमनाविर
हेपिसंस्कारंप्रत्यपेक्षान्यत्वेनहेतुत्वौचित्यात् किंचउपेक्षास्थले अनंतसंस्कारकल्पनायाः गुरुत्वात्संस्कारंप्रतिउपेक्षान्यनिश्चयत्व
नहेतुत्वौचित्यात् संस्कारेप्रमाणंदर्शयति स्मरणंप्रत्यभिज्ञायामप्यसौहेतुरुच्यते यतः स्मरणंप्रत्यभिज्ञांचजनयतिअतः संस्का
रःकल्प्यते विनाव्यापारंपूर्वानुभवस्यस्मरणादिजननासामर्थ्यात् स्वस्वव्यापारान्यतराभावेनैकारणत्वासंभवात् ननुप्रत्यभिज्ञाप्र
तिनत्तत्संस्कारस्यहेतुत्वेप्रत्यभिज्ञायाः संस्कारजन्यत्वेनस्मृतित्वापत्तिरितिवाच्यं अन्ययाजकत्वात् परेतनुबुध्यसंस्कारात्प्रत्य
भिज्ञानुदयादुद्बुध्यस्यहेतुत्वापेक्षयानत्तास्मरणस्यैवप्रत्यभिज्ञाप्रतिहेतुत्वंकल्पतइत्याहुः अदृष्टंनिरूपयति धर्माधर्मविहृष्टस्या
धर्मः स्वर्गादिकारणं स्वर्गादिसकलसुखानांस्वर्गसाधननारीरादीनांचसाधनेधर्मइत्यर्थः तत्रप्रमाणंदर्शयति यागादीनंगांस्ना
नादिव्यापारः सदुत्पन्नितः यागादिव्यापारतयाहिधर्मः कल्पते अन्यथायागादीनांचिरंविनष्टतयानिर्व्यापारतयाचकालेतभावीस्व

51
1919

र्गजनकत्वंनस्यात् ननुयागध्वंसएवव्यापारःस्यात् नचप्रतियोगिध्वंसयोरेकत्राजनकत्वं सर्वत्रतथानुभवाभावात् नचफलानंत्यं॥
तन्मतेचरमफलस्येवापूर्वनाशकत्वान्नतदिनिवाच्यं समवायिअवयविनोपिसहकारित्वादित्यतआह अतोगंगास्नानेतिगंगास्नान
हिस्वर्गजनकत्वे अनंतजलसंयोगध्वंसानांव्यापारत्व मपेक्ष्यैकमपूर्वंकल्प्यतेलाघवादितिभावः ननुध्वंसोमास्कव्यापारः किंतुनिर्व्यापा
रस्यागादीस्वर्गहेतुत्वं नचनिर्व्यापारस्यचिरध्वस्तस्यकथंकारणत्वमितिवाच्यं अनन्यथासिद्धपूर्ववृत्तित्वस्यतत्रापिसत्वात् अस्मद
हिनपूर्ववृत्तिर्हेहिवह्निः संयोगादेः कारणत्वेदृष्टंननुसर्वत्रेति अतआह कर्मनाशाजलस्पर्शादिनानाश्यस्त्वसौमतः यदित्यपूर्व
नस्यानुदाजलस्पर्शादिनानाश्यत्वंधर्मस्यनस्यात् नहितेनयागादेर्नाशः प्रतिबंधोवाकर्तुंशक्यते तस्यपूर्वमवृत्तित्वादिति अधर्मोन
रकादीनांहेतुर्निंदितकर्मजः नरकादिसकलदुःखानांनारकीयशरीराणांचसाधनेधर्मइत्यर्थः तत्रप्रमाणमाह प्रायश्चित्तादिश्चो
मो यद्यधर्मोनस्यानदाप्रायश्चित्तादिनाश्यत्वंनस्यात् नहितेनब्रह्महत्यानादीनांनाशः प्रतिबंधोवाकर्तुंशक्यते तस्यपूर्वमेवविनष्टत्वा
दितिभावः जीववृत्तीच्छिमोक्षणा इमोनुवासना अन्योज्ञानादपिविनश्यतः अपिनाभोगपरिग्रहः ननुतत्त्वज्ञानस्यकथंधर्मनाशकत्वं नाभु
क्षीयतेकर्मकल्पकोटिशतैरपीतिवचनविरोधात् इत्थंचतत्त्वज्ञानिनोशरीरितिकाव्यव्यूहेनसकलकर्मणांभोगेनक्षयइतिचेन्न भोगस्यवेद
बोधितनाशकोपलक्षकत्वात् कथमन्यथाप्रायश्चित्तादिनाकर्मणांनाशः तदुक्तं ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेतथे तिक्षीयंतेचा
स्यकर्माणितस्मिन्दृष्टेपरावरेइतिच ननुतत्त्वज्ञानिनस्तर्हिशरीरावस्थानंस्यादुःखादिकंचनस्यात्तज्ञानेनसर्वकर्मणांनाशादितिचेन्न भार
ब्धेतरकर्मणामेवनाशात् एतच्छरीरभोगजनकंहियत्कर्मतत्प्रारब्धं तदभिप्रायमेवनाभुक्तमित्यादिवचनादिति ग्रन्थेनिरूपयति ग्रन्थोध्वनिश्च
र्णश्चमरुद्गादिभवोध्वनिः कंठयोगादिजन्यावर्णास्तेकादयःस्मृताः सर्वेःग्रन्थोनभोवृत्तिः आकाशसमवेतः दूरश्रुतग्रन्थस्याग्रहणादतश्चात्रा
त्मनस्तत्प्रत्यक्षंइष्यते ननुमृदंगादावछेदोत्पन्नेग्रन्थेकथंश्रोत्रेउत्पत्तिरतआह वीचीतरंगन्यायेनतदुत्पत्तिस्तत्कीर्तिता आयुग्रन्थस्यबहिर्देश
वृत्तिर्नान्यः ग्रन्थस्तेनवग्रन्थेनजन्यते तेनचापरस्तद्व्यापकएवंकर्णशष्कुल्याग्रहात् कदंबगोलकन्यायादुत्पत्तिः कस्यचिन्मतेआयुश
ब्देनदशदिक्कदशग्रन्थाः उच्चार्यते तश्चान्यदशउत्पाद्यतइतिभावः अस्मिन्नुकल्पेगोरवादकृतकस्यचिन्मतेइति ननुग्रन्थस्यनित्यत्वादुत्पत्तिक
थनमयुक्तमत्राह उत्पन्नःकोविनष्टःकइतिबुध्यैरनित्यता ग्रन्थानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः ननुसएवायंककारइतित्र
त्यभिज्ञानाच्छब्दानांनित्यत्वे इत्थंचोत्पादविनाशबुद्धिर्भ्रमरूपेवक्ष्यतेआह सायंकइतिबुध्यिस्तुसाजात्यमवलंबते तत्रप्रत्यभिज्ञानंहितत्सजातीयत्वंवि
षयीकरोतुनद्यक्यभेदंविषयः उक्तप्रतीतिविरोधात् इत्थंचदूरेपिबुध्योनभस्वमितिननुसजातीयसोयमितिप्रत्यभिज्ञाकुत्रदृष्टेयतआह तेदेवाधर्म
मित्यादिसाजातीयेपिदर्शनात् यदेवाधर्मंन्यनरुतंतदेवाधर्मयापिरुतमित्यादिदर्शनादितिभावः श्रीमन्महोपाध्यायश्रीविश्वनाथपंचाननभट्टा
चार्यविरचितासिद्धांतमुक्तावलीसमाप्तः ॥ ॥ ॥

मु॰ ब॰
२५

इतिमिश्रीतमुक्तावलीसमाप्तः ॥श्रीरामचंद्रप्र॰॥

52
1199

ग्रम
२५